Chap-2

# द्वितीयो परिच्छेदः

## च-मनोविज्ञानस्य स्वरूपं परिभाषा च।

मनसोविज्ञानं मनोविज्ञानं कथ्यते। यस्मिन् शास्त्रे मनसोविचाराणां व्यवहाराणाञ्च विवेचनं क्रियते सैव शास्त्रं मनोविज्ञानशास्त्रमिति निगद्यते। मानसिक विचाराः एव क्रियाभिः प्रकाश्यन्ते। आङ्गलभाषायां 'सायक्लाजी' इति शब्दो मनोविज्ञानस्य पर्यायः एव ग्रीकभाषायाः 'साइके' 'लोगस' इत्येतयोः शब्दयोः योगेन 'सायक्लाजी' शब्दस्य निष्पत्तिर्भवति। तत्र 'साइके' इति शब्दस्य अर्थः आत्मा, लोगस इति शब्दस्य अर्थः विचारश्चेति। प्राचीनकाले पाश्चात्यदेशेषु 'सायक्लाजी' शब्दस्यात्मविज्ञानार्थे प्रयोगोऽभवत्। मनोविज्ञाने चेतनस्याचेतनस्य च मनसः प्रत्यक्षाणां परोक्षाणाञ्च व्यवहाराणामध्ययनम् क्रियते। भारते मनोविज्ञानविषयकं यत्किञ्चिदपि कार्यमतीतकालेऽभूत तद् दर्शनशास्त्रस्याङ्गभूतमेव। प्राचीनकाले प्रयोगार्थ मुपकरणानामभावात् वैज्ञानिकीप्रक्रियायाः अपरिचयात् मनोवैज्ञानिक निष्कर्षणां प्रयोगाय तथाऽवसरो नासीत्। यथाधुनिके युगे विद्यते। तेन मनोविज्ञानस्य प्रायोगिक सामाजिकादिशाखानां प्रगति पथोऽवरुद्धः जातः। ऋग्वेदे प्रसिद्धमन्त्रेषु 'सं वो मनांसि जानताम्' समानं मनः स चित्तमेतेषाम्'२६ इत्यादिषु बहुत्र मन्त्रेषु मनसस्तत् व्यापाराणां चोल्लेखो दृश्यते। तथैव शुक्लयजुर्वेदे ऋग्वेदेपरिशिष्टे च संकल्पसूक्ते 'यज्जाग्रतो दूरमुदेति दैव'२७ मित्यादि मन्त्रेषु यदपूर्वयक्षमन्तः प्रजानामित्यत्र२८ मनसोऽपूर्वत्वेन यक्षत्वेन प्रजानामन्तः स्थित्वेन च वर्णनं दृश्यते। उपनिषत्स्वपि मनसैवानुद्रष्टव्यम्,२६ मनएव मनुष्याणां कारणं बंधमोक्षयोः।३० मनसा हि एव पश्यति मनसः श्रृणोति।३१ मनो वै ब्रह्मेत्यमनसो वाक्य शतैर्मनसं उल्लेखपूर्वकं सर्वत्र तस्य प्राधान्यं सकल व्यवहारहेतुत्वं सर्वपुरुषार्थ साधनत्वं च द्योत्यते। सर्वप्रवृत्तिमूलत्वञ्च मनसः संकल्पस्याह तस्माद् यत् पुरुषो मनसाऽभिगच्छति तद्वाचा वदति। तत्कर्मणा करोति इति।३२ तथा परमेश्वरस्यापि मनः स्थानीयां मायायां यः कामः स एव सृष्टिमूलमुक्तम्। तस्यान्तर्मनसि कामः समवर्तत इदं सृजेयमिति।३३ तथा कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।३४ एवं देहेन्द्रियादि संघातरूपे मनुष्ये प्रत्यक्षेणागमेन च मनसः प्राधान्ये ज्ञाते जिज्ञासास्यत्वमुपपद्यते। भारतीयैः न केवलं पदार्थ प्रत्यक्ष विषयक एव ऊहापोहो विहितः परं मन सम्बन्धिनां बुद्धिचिन्ताहंकाराणम् प्रकृतिपुरुषयोः आत्म-परमात्मनोः कारण-कार्ययोःहेतु हेत्वाभासानां अनुभवः स्मृतिप्रमाणाम् विषयेऽपि सूक्ष्मभावालोकनं कृत्वा केचिद् सिद्धान्ताः स्थिरीकृताः।

विज्ञानेन यथा योरोपीयदेशेषु भौतिकसुखसमृद्धीनां द्वारमुद्घाटितम्, तथा जीविकोपार्जन विषये महानसंघर्षोऽपि जनितः। प्रवर्द्धमानैः सुखसाधनैः सह

सुखेच्छापि बलवत्तराऽभवत्। भारते मनोविज्ञानविषयकं यत्किञ्चिदपिकार्यमभवत् तद् दर्शनशास्त्रस्याङ्गभूतमेव। विदेशीयशासनात् उन्मुक्तेरनन्तरम् भारते ज्ञानपिपासायाः वृद्धिः स्वाभाविकी। साम्प्रतिका विद्वांसो भारतीयं साहित्यमधीत्य तस्यपाश्चात्येन तौलनं कुर्वाणा द्वयोरपि द्राक्ष्यं प्राप्तुं सचेष्टा वर्तन्ते। सर्वेषामपिदेशानां साहित्ये विचारसरणौ च तत्रत्यायाः जीवनपद्धतेः प्रभावो दृश्यते। भारते दुःखान्तनाटकानां सृष्टिः ग्रीकदेशादिव नोपलभ्यते। साहित्ये आत्महत्याः चर्चैवनास्ति। एवमेव मनोवैज्ञानिकविचारेष्वपि भारतीयदर्शनस्य प्रभावः स्पष्टः एव। ज्ञानस्य साधनानिचत्वारिप्रत्यक्षानुमानोपमानागमाः। तत्र प्रधानभूतं प्रत्यक्षम्। तच्चेन्द्रियार्थ सन्निकर्षोत्पन्नम् व्यपदेश्य व्यभिचारिव्यवसायात्मकं ज्ञानम्। ज्ञानञ्चात्मनो गुणः। तच्चेन्द्रियपदार्थ संयोगे, ततो मनसा सहेन्द्रिय संयोगे ततो मनसा सह आत्मना सह संयोगे उत्पद्यते। मनश्चान्तरिन्द्रियम् आत्मनः सह मनसः सन्निकर्षः सर्वज्ञानेष्वावश्यकः। एवमेव प्रत्यक्षज्ञाने इन्द्रियार्थ सन्निकर्षः आवश्यकः। प्रत्यक्षमपि द्विप्रकारकम् निर्विकल्पकं सविकल्पकञ्चेति। प्रत्यक्षं ज्ञानं नान्यज्ञानमाश्रितं भवति। अत एव तद्ज्ञानाकरणकमिति निगद्यते। निर्विकल्पकं प्रत्यक्षं सविकल्पकं पूर्वं भवति। नहि तत्र पदार्थस्यगुणरूपादीनां परस्परं सम्बन्धोऽवगम्यते। इयं प्रत्यक्षस्य पूर्वाकोटिः। सा च सविकल्पक प्रत्यक्षेणानुमीयते। सविकल्पकं प्रत्यक्षं व्यवसायात्मकमपि कथ्यते। अस्मिन् पदार्थस्य वस्तु गुण कियाजाति नामादीनामपि ज्ञानं जायते। अत्रपूर्वप्रत्यक्षजन्याः संस्काराः अपि सहाय्याः भवन्ति। अत्र च संस्काराः स्मृतिं प्रेरयन्ति। प्रत्यक्षे केवल इन्द्रियार्थ सन्निकर्षः आवश्यकः। प्रत्यभिज्ञायामतीत संस्कारोऽप्येक्षते। नैयायिकैः प्रत्यक्षस्य लौकिकालौकिकौ द्वौभेदौ स्वीकृतौ। लौकिकं प्रत्यक्षमपि द्विविधम् बाह्यंमानसञ्चेति। बाह्यं तु इन्द्रिय भेदेन चाक्षुषमपि पञ्चप्रकारकम् भवति। अन्तरिन्द्रियेणात्मनो गुणानां प्रत्यक्षं मानसम्। अलौकिकं प्रत्यक्षं त्रिविधम् - सामान्यलक्षण सन्निकर्षजम्, ज्ञानलक्षणसन्निकर्षजं योगज सन्निकर्षकञ्चेति। तत्र प्रथमेन अनेक पदार्थज्ञाने जाते सति ज्ञानं भवति। इदं जातिविषयकं प्रत्यक्षम्। अनेन कश्चिन्मनुष्यं दृष्ट्वा तत्र मनुष्यत्वं सामान्यं परिगृह्य सर्वमनुष्यज्ञानं संभवति। ज्ञानलक्षण सन्निकर्षजं प्रत्यक्षं साहचर्याश्रितं भवति। येन चन्दन काष्ठं दूरादेव दृष्ट्वा तत्सुगन्धस्य प्रत्यक्षं जायते।

पाश्चात्य चिन्तकाः प्रत्यक्षस्य महत्वमेव न स्वीकृतवन्तः। तेच बुद्धिवाद पक्षपातिनः। विश्वस्य व्याख्या बुद्धेः सन्तुष्टीकरणमेव तेषां लक्ष्यम्। भारते च चिन्तनस्य लक्ष्यमात्मसाक्षात्कारः सा चानुभवरूपः। एतदेव कारणं यत् शेलिङ्ग वर्गसां प्रभृतीन् द्वित्रान् विहाय अन्यैः स्पिनौजालिवनीज-काण्टाभिदर्शनिकैः प्रत्यक्षज्ञानस्य प्राधान्यं नाङ्गीकृतम्। प्राच्यैः ज्ञानस्य द्वौभेदौ स्वीकृतौ अनुभवः स्मृतिश्च। तत्र ज्ञात विषयकं ज्ञानं स्मृतिः, स्मृतिव्यतिरिक्तं ज्ञानं अनुभवः। ज्ञातविषयकमपि ज्ञानं द्विधा तत्रपूर्वास्मृतिः अपरा च प्रत्यभिज्ञा । यदा किञ्चिद्

वस्तुदृश्यते ज्ञायते वा तदा तद्विषयकं ज्ञानमात्मनि स्वविषयकं संस्कारं जनयति। वस्तुनो ज्ञानं तु चलं भवति। परं तद्विषयकं ज्ञानमात्मनि स्वविषयकं संस्कारं जनयति। वस्तुनो ज्ञानं तु चलं भवति। परं तद्विषयकः संस्कारः स्थिरोभूत्वा तिष्ठति। कालान्तरेण केनापि कारणेनोद्बुद्धः स एव संस्कारो बाह्येन्द्रियादि साहाय्यं विनाऽपि पुनरपि तत्पदार्थविषयकं ज्ञानमुपस्थापयति। तदेव ज्ञानं स्मृतिरिति संज्ञातं भवति। स्मृतेःकारणात् संस्कारोद्बोध एव। अदृष्टमेवोद्दिश्य श्रीहर्षेणोक्तम् 'अदृष्टमप्यर्थमदृष्टवैभवात् भारतीयाः जीवात्मन् आनन्त्यमविच्छिन्नत्वं च स्वीकुर्वन्ति। तेषां मते न केवलं शरीरापेक्षस्तस्य विकासो भवति। गुणापेक्षोऽपि भवत्येव। कालक्रमेण चेतनाशक्तिरुद्बुद्धतरा जायते। तेन निमनयोनिषु जन्मानन्तरं जीवात्मा क्रमेणाधिक सतवसम्पन्न योनिषु जन्मं लभते। क्रमेण विकासमापन्ना चेतना शक्तिः स्वाभिव्यक्तये साधुतरं साधनमपेक्षते। तमः प्रधान योनिभ्यो रजः प्रधानयोनिः रजःप्रधानयोनिभ्यश्च सत्वप्रधानयोनिर्लभमानो जीवात्माशनैःशनैः जन्मविनिवृतो जायते——

धर्मेणगगनमूर्ध्वंगगनमधस्ताद्भवत्यधर्मेण।

ज्ञानेनचापवर्गो विपर्ययादिष्यते बन्धः।।३७

एवं भारतीयदर्शनमते जीवस्योन्नतयेऽनन्तोऽवसरः तदर्थं च महानकालोऽपेक्ष्यते।पाश्चात्यचिन्तकेषु डार्विनानुयायिनो रूपकाकृतेस्तु क्रमिकं विकासमङ्गीकुर्वन्ति। शरीराणां विकासं तु क्रमेण सरलाज्जटिलं मन्यन्ते। चेतनायाः विषये तेषां दृष्टिः भिन्नः।सांख्यमते तेषां साक्षीकेवलो निर्गुणाप्रकृति सहचारीपुरुषः। योगसूत्रकारेण पतञ्जलिना सांख्यमतं स्वीकुर्वतः ईश्वरसत्तायां विश्वासोऽभिव्यक्तः। स च क्लेशकर्म विपाक आशयैः परामृष्टं पुरुषविशेषमीश्वरं मनुते। ईश्वरःकालेनावच्छेदात् पूर्वेषामपि गुरुः। कटककुण्डलादीनिवस्तूनि आभूषणादीनि सुवर्णेन निर्मितानि भवन्ति। परं तत्वदृष्ट्या कटककुण्डलादीनि आभूषणानि न सुवर्णाद् भिन्नानि। वस्तुतः सुवर्णमेव कटककुण्डलादि आभूषणरूपं व्याप्य समुपतिष्ठते। न सुवर्णादपरमन्यत्किमपि। सुवर्णमेवविभिन्नेषु रूपेषु वर्तते। एवमेव चेतनारसचेतनयोर्मध्ये एकत्वमेव। तथैव सुवर्णकटककुण्डलयोर्मध्ये एकत्वमेव। यथा सुवर्णमेव कटक कुण्डलादि विभिन्नरूपेषु वर्तते तथैव चेतनैव रसचेतनारूपे विद्यते। व्यवहारवशादेव चेतनेयं रसचेतनेयं इति निरूप्यते। रसास्वादनं नामप्रियमधुरानुभूतिः। कलाकारः स्वकौशलेन सहृदयोरसप्रवणतया जीवनस्यदैनिकंसत्यंपरिपालयन् तदेवोपादानीकृत्य रसमास्वाद्यते। वेदान्तिनस्तु जगतो मूलमव्यक्तं रूपं ब्रह्मजानते।तन्मते अन्यत् सर्वं मायैव।सर्वाणिपरिवर्तनानि। सर्वं च परिवर्तमानं मायिकम्।एवं सति त्रिष्वपि सांख्ययोगवेदान्तमार्गेषु शरीरव्यतिरिक्त परमोच्चसत्ताविषय एकमत्यम्। एवमेवन्यायवैशेषिकमतयो रपि। यौरोपीयास्तु मानवसत्तायाः अमूर्तत्व पक्षे ईश्वरं प्रत्यास्थां प्रकटयन्ति, आत्मनः शाश्वतिकतायाः विषये तु संशयालवः एव।

भारतीयाः समग्रमपि विश्वं कस्यश्चिद् बुद्धिगम्यायाः विकासयोजनायाः अङ्गं मन्यमानाः पूर्वजन्मानिभविष्यन्ति च जनूंषि स्वीकुर्वाणाः साधनभूतैरतीतजन्मभिः क्रमेणोन्नतिपथमवलम्ब्यमानमात्मानमात्मानं मन्वते। भारते आस्तिका इव नास्तिकाप्याध्यात्मिकीं साधनां प्रत्युन्मुखा दृश्यते। मानवजातेः संघटनायां साम्प्रतं तस्याः संवेगप्रवणं वृत्तिः, संवेगप्रवणा प्रकृतिः, संवेगप्रधानः स्वभावो वा सर्वाधिकमहत्वपूर्णा वर्तते।प्रतिदिनं समाचारपत्रेषु प्रकाशमानाः समाचाराः घृणा,अनुरागा,ईर्ष्या,गार्व, कामुकता,अहंकार, साहसादि संवेगजाएव भवन्ति। भारतीयैः संवेगानां प्रभावविषये दीर्घकालव्यापिनीं परीक्षां कृत्वा केचिद् सिद्धान्ताः स्थापिताः। भारतदेशेसंवेगानां क्षेत्रं व्यापकतया स्वीक्रियते।भारतीयमते अनुभवः विचारः संकल्पेक्षाशक्तिर्वा चेतनायाः: एवोत्तरोत्तरा उत्कृष्टा कोटयः। चेतनायाश्च चतुर्थीकोटिः अन्तःकारणिकी, अन्तः प्रज्ञाविषयिणी वा। पञ्चमी च संकल्पशक्तिरध्यवसायशक्तिर्वा मनोवैज्ञानिकैः फ्रायडादिभिः चेतनमचेतनं पूर्वचेतनमिति यानि त्रीणिरूपाणि मनसः स्वीकृतानि तान्यंशतो भारतीयमतानुकालानि। तत्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वाञ्च। आसां निरोधे मनः सुसमाहितं भवति, निरोधश्चाभ्यासवैराग्याभ्यां सिध्यति। चित्तरूपानदी नामोभयतो वाहिनी भवति कल्याणाय, वहति पापाय च। तत्र वैराग्येण विषयस्त्रोतः शोष्यते।दर्शनाभ्यासेन च विवेक स्रोतः उद्घाट्यते। शुष्केऽपि विषयस्रोतसि तत्संस्काराः बीजरूपाः अवतिष्ठन्त एव।नहि कदाचिद् वशीकृतं चित्तं सर्वकालाय वशमापद्यते।दीर्घकालयावत् निरन्तरं तपसा, ब्रह्मचर्येण, विद्यया, श्रद्धया चाभ्यासस्य सेवनं विहितम्। एवं निरन्तर संस्कारवान अभ्यासे च दृढ भूमिर्भवति।समाहिते चित्ते वितर्क विचारानन्दऽस्मिताश्रपानुगमात् सम्प्रज्ञातः समाधिरूपलभ्यते।एवं निर्बीजः समाधिर्जायते।येषां संवेगाः तीव्राः भवन्ति तेषां समाधिफलमासन्नं भवति। यद्यपि प्राचीनकाले भारते मनोविज्ञाननामकं पृथकशास्त्रमेव नासीत्।वेदादारम्य सर्वत्रैव मनोविज्ञानविषयिकी चर्चा दृश्यते समुपलभ्यते च। पुरुषसूक्ते 'चन्द्रमा मनसो जातः३८ इत्यत्रब्रह्मपुरुषस्य विराटरूपेण कल्पितस्यमनः चन्द्रमसो योनित्वेनाम्नातम्। अन्यत्र श्रुतिषु शास्त्रान्तरेषु चाध्यात्ममनस आधिदैविकरूपेण अधिष्ठातृ देवता रूपेण चन्द्रमसोल्लेखो दृश्यते। बृहदारण्यकोपनिषदि एतद् दृश्यते यत् यदामनः पिण्डात्माभिमानं विहाय प्राणात्म भावालम्बनेन सर्वेषां हिताय तिष्ठति तदैव सा देवता मृत्युमपहत्य एतन्मनः मृत्युमतिवहति । तदैतद् मनः चन्द्रमा भवति। मृत्यमतिक्रान्तो भाति च।३९ छांदोग्य,कठ,केन,बृहदारण्यकादिषु उपनिषत्सुबहुत्र मनसोल्लेखः स्वभावधर्मादिषु निरूपणं दृश्यते। सामवेदीयकेनोपनिषदि प्रथमश्लोके एव केनेषितं पततिप्रेषितं मनः'इत्यादौ स्पष्टतया आत्मभिन्नत्वेन मनसो वर्णनं सुस्पष्टमेव । तत्रात्मनः प्रेरकत्वं मनसश्च क्रियावत्वं गम्यते। कठोपनिषदि बुद्धिर्मनसोः भिन्नवत्वेन, बुद्धेसारथिरूपेण नियन्तृतया मनसश्चेन्द्रियरूपाश्वनियमने प्रग्रहरूपेण

करणतया निर्देशोलभ्यते।४० तार्किकाः सुखाद्यान्तर पदार्थसाक्षात्कार करणत्वेन मनसः सद्भावमन्तरिन्द्रियत्वं च स्वीकुर्वन्ति। मनसोऽगुणत्वेन अतीन्द्रियत्वात् प्रत्यक्षविषयत्वात् संभवात् अनुमानमेव मनसोऽस्तित्वमे प्रमाणम्। तथाहि सुखादिसाक्षात्कारः सकरणकः जन्मसाक्षात्कारत्वात्, रूपादिसाक्षात्कारवदित्यनुमित्यैव इतरबाधसहकारेण मनसः सिद्धिः।घटतद्रूपादिबाह्य विषयाणां चक्षुरादिभिरिन्द्रियैरेव साक्षात्कारसंभवेऽपि सुखदुःखाद्यान्तरपदार्थानां तद्संभवात् तदर्थमतिरिक्तमन्तरिन्द्रियम् मनो द्रव्यं सिध्यतीतिभावः। मनोऽपित्रसरेण्वात्मकंभूतमेव अदृष्टविशेषस्य प्रतिबंधकतया च न ज्ञानयोग पद्यमन्यथा तवापिशासनादिकाले स्पर्शनवारणा सभवात्।४१ तार्किकानां मते मनसोऽणुपरिमाणत्वं युक्तिसिद्धम्।युगपत् ज्ञानानुपपत्तिर्मनसो लक्षणमिति गौतमीयसूत्ररनुसारेण चाक्षुषरासनादिज्ञानानायोगपद्यमेव तेषां मते मनसो प्रमाणम्।४२ ज्ञानयोगपद्यादेकं मनः यथोक्त हेतुत्वाच्चाणुःइत्यादीनि च गौतमीयन्यायसूत्राणि। आत्मेन्द्रियार्थ सन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिंगम तद्भावादणुः मनः इत्यादीनि वैशेषिक सूत्राण्यापि मनसोऽनुमानसिद्धत्वं प्रतिशरीरमेकत्वमणुत्वं चाहुः।४३ प्रभाकराद्यमीमांसकैरपि तार्किकमतवदेव मनसोऽगुणत्वमधिकृत्य द्रव्यत्वमात्मविशेष गुण सुखदुःखादि प्रत्यक्षे च करणत्वादन्तरिन्द्रियमङ्गीकृतम्।जैनमतानुयायिनः मनसः करणत्वेऽपि न इन्द्रियत्वमिति वदन्ति। उक्तञ्चानन्तवीर्येण प्रमेयरत्नमालायामिन्द्रियं चक्षुरादि, अनिन्द्रियं मनः४४ इन्द्रियप्राणवत् मनसोऽपि द्रव्यभाव भेदात् द्वैविध्यम्। द्रव्यमनोहि द्रव्येन्द्रियवत् पुद्गलादारब्धम्।भावमनस्त्वर्थग्रहणशक्ति व्यापाररूपम्। बौद्धमतानुयायिनः वैभाषिक योगाचार माध्यमिकभेद भिन्नाः यद्यपि द्वादशायतनान्तर्गतं मनः बुद्धिव्यतिरिक्ते नैव स्वीकुर्वन्ति, यथोक्तं बोधिचित्त विवरणे ज्ञानेन्द्रियाणिपञ्चैव तथा कर्मेन्द्रियाणि च। मनोबुद्धिरिति प्रोक्तं द्वादशायातनं बुधैः।४५

सांख्यमतानुयायिनः चित्तापरनामधेयाद् बुद्धिस्वरूपाद् मनसो भिन्नत्वमाहुः। बुद्धेरेकादशकमेन्द्रियमेव मनः। अध्यवसायोबुद्धिरिति४६ प्रधानान्तः करणस्य बुद्धेर्लक्षणम्। कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकमितिवैविध्यमिन्द्रियाणां दर्शितम्। तत्र चोभयात्मकं मनः इति सूत्रेण मनसः कर्मेन्द्रिय ज्ञानेन्द्रियोभयात्मत्वं उभयेन्द्रिय प्रवृत्यधिष्ठानादुक्तम्।४७ चक्षुरादिव्यापारेषु मनसः प्राधान्यम्। मनोव्यापारे चाहंकारस्य अहंकारस्य, अहंकारव्यापारे च बुद्धेः प्राधान्यमिति बोध्यम्। इन्द्रियैस्तुचक्षुरादिभिरालोचनं नाम निर्विकल्पक वृत्तिविशेषो जायते। मनस्तु अयं घटः इत्यर्थाकारं संकल्पं सविकल्पात्मकं करोति। अहंकारस्तु ममेदमनुकूलंप्रतिकूलं वेति अभिमन्यते। बुद्धिस्तु ममेदं ग्राह्यमस्ति, निश्चिनोतीति तेषां व्यापारभेदः। विज्ञानभिक्षुमतेनतु इन्द्रियेण निर्विकल्पक सविकल्पकरूप द्विविधमेव ज्ञानमालोचनं जायते। प्रमाण विपर्यय विकल्प निद्रास्मृतयः पातञ्जलसूत्रोक्ता वृत्तयः सांख्यानामपि सम्मताः। बुद्धेर्विषयाकारपरिणामात्मक वृत्तिरेव ज्ञानम्। अभिमानिकः पौरुषेयबोधः

फलम्। मनोबुध्यहंकाराणामन्तःकरणानां जडत्वं परिच्छिन्नत्वमनित्यत्वं च सांख्यानामपि मतम्। शैवानां तान्त्रिकानाञ्चाभिमते जडशक्तिप्रधाना आत्मस्वरूपभूता चलचितिरेव मनोभवति। स्फूर्त्यावरणन्यास एव चित्तेश्चलनम्। एतादृशमनोरूपत्वमेवात्मनो जडाद्विशेषः। सविकल्पक निर्विकल्पकभेदेन मनसो ज्ञानात् द्वैविध्यमेवोक्तम्। चितिरेवस्वयंस्वरूपं गोपयित्वा यदासंकोचं गृह्णाति तदा संकुचितग्राहकरूपा अर्थग्रहणोन्मुखी सती चेत्येन नील सुखादीनां संकुचितैव चित्तं भवति। चितिरेव चेतनापदादवरूढा चेत्यसंकोचिनी चित्तम्।

## छ-मनोविज्ञाने चैतन्यस्य महत्ता आत्मानिरूपणञ्च।

निर्गुणात्मवादिनां मते चैतन्यं प्रकाशस्वभावं विहाय सर्वमेव सुखदुःखादिकं बन्धमोक्षादिकं च मनसः एवान्तःकरणस्य तस्यैवकर्तृत्वाद् भाक्तृत्वाच्च।
इन्द्रियाणिपराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु पराबुद्धिर्योबुद्धेः परतस्तु सः।।४७
यो बुद्धेः परतः सैवात्मा, उपनिषत्सु च सर्वत्रैवात्मा प्राधान्येन सर्वनियन्तृत्वेन च गीयते।
आत्मानंरथिनंविद्धि शरीरं रथमेवतु।
बुद्धिंतुसारथिंविद्धि मनःप्रग्रहमेव च।।४८
इत्यत्र रथस्थानीयशरीरस्य बुद्धिसारथिविश्लिष्टस्य आत्मा रथित्वेन कल्पितः——
इन्द्रियाणिहयानाहुर्विषयांस्तेषुगोचरान्।
आत्मेन्द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः।।
येनरूपंरसंगंधंशब्दानुस्पर्शश्च मैथुनान्।
एतेनैवविजानाति किमत्रपरिशिष्यते।।४६
जाग्रतस्वप्नायवस्थात्रयमपि स्वतः आरोपेण वा कथञ्चिदात्मनः एव।तदुक्तञ्च स्वप्नान्तं च जागरितान्तं चोभौ येनानुपश्यति। य एव सुप्तेषु जागर्तिकामं पुरुषोनिर्मिमाणः।५० इति पुरुष एव स्वप्नद्रष्टा। स चात्मा सर्वान्तरत्वात् परानन्दरूपत्वाच्च प्रियतमो भवति। उक्तञ्च वात्स्यायनेन सूत्र भाष्ये 'तत्रात्मासर्वस्य द्रष्टा सर्वस्यभोक्ता, सर्वज्ञः,सर्वानुभावकः तस्यभोगायतनं शरीरम्,भोगसाधनानि इन्द्रियाणि भोक्तव्या इन्द्रियार्थाः। भोगोबुद्धिः।सर्वार्थोपलब्धौनेन्द्रियाणि प्रभवन्तीति। सर्वविषयमन्तःकरणं मनः इत्यादि।५१ नित्योऽयमात्मा प्रैति, पूर्वशरीरम् जहातिम्रियते इति।प्रेत्य च पूर्वशरीरं हित्वाभवति जायते, शरीरमान्तरमुपादत्ते। सर्वेषु उपनिषदेषु

हृद्देशे एवात्मनोऽवस्थानं श्रूयते। छांदोग्योपनिषदि 'एष आत्मा अनन्त हृदये इति। स वा एष आत्मा हृदीति च।५२ प्रश्नेऽपि हृदि ह्येष आत्मेति।५३ श्वेताश्वरेऽपि कठवदेव दृश्यते। सदा जनानां हृदयेसन्निविष्टः५४ स्मृत्यादिषु आत्मनो विभुत्वकीर्तनात् कथं तस्य हृदयेऽवस्थानं युज्यते इति चेन्न, हृदये आत्मनो विशेषणाभिव्यक्ति संभवात् हृदयदेशे ध्यानादिना तस्य बुद्धिसाक्षित्वेन उपलब्धिदर्शनात् बुद्धेरन्तःकरणस्य हृदयदेशे अवस्थानाद् हृदिविशेषतोऽवस्थानमुक्तं बुद्धेरात्मनः। आत्मनः सर्वव्यापित्वं तु न्यायवै शेषिक-सांख्य-पातञ्जल-मीमांसकाद्वैतवेदान्तिनां सर्वेषामेव सम्मतम्। जैनमते आत्मनो देहपरिमाणवत्वं वैष्णवमतेचाणुपरिमाणवत्वं देहबुध्यादिउपाधि परिच्छेदजनित विभ्रान्ति निमित्तमिति परेषां प्रतिभाति।आत्मनो मनः प्राणादीनां संघाते उत्पत्तिरागमनं च श्रूयते। अयमात्मा सर्वान्तरत्वात् परानन्दरूपत्वाच्च प्रियतमो भवति।नैयायिकानां मते आत्मेन्द्रियाद्यधिष्ठाताकरणं हि सकर्तृकम्।५५ इत्यादिना आत्मनेन्द्रियादिसंघातप्रवर्तकत्वमुद्घोषितवन्तः।उक्तञ्च मुक्तावल्याम्——'इन्द्रियाणां शरीरस्यच परम्परया चैतन्य संपादकः।५६ मीमांसकादीनां मते आत्मा सगुण एव कर्ताभोक्ता च। आत्मा द्रव्यबोधरूपः तस्यपरिणामोबुद्धिः। तया च प्रत्यक्षीक्रियते।अतोमानसप्रत्यक्षगम्यएवात्मा। वैशेषिकानां मते आत्माज्ञानसुखादिगुणाश्रयोऽपि अप्रकाशात्मकोऽपि विषयवत् प्रकाशते। वैशेषिकानां मते प्रकाशस्य प्रकाशमानस्य सत्ता एव नाङ्गीक्रियते।अयमात्माभोक्ता,भोगायतनं शरीरम्, भोगस्थानानि इन्द्रियाणि भोग्याः सुखादय बाह्याभ्यान्तरश्च पृथिव्यादयः भुक्तिश्च वेदनेति पंचसुविधासु तत्वं परिसमाप्यते। प्रभाकरादिनः वेदान्तसम्मता आत्मनानन्दरूपता नाङ्गीकृता। बौद्धमते तु सौगिनः आत्मनोऽनभ्युपगमात् क्षणिक विज्ञानधरैवाहमहमित्याकारालयविज्ञानाख्या आत्मा तस्यैव ज्ञातृत्व भोक्तृत्वकर्तृत्वादि धमत्वाद् जैनैरपि कर्तृभोक्तृरूपेणात्म स्वरूपमभ्युपगतं नित्यं चैतन्यगुणकं च। ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो जीवश्चैतन्यलक्षणः। किन्तु देह परिमाणेवात्मा न विभुरणुर्वा।न चास्यतदुपेततत्वमुपपद्यते प्रत्यक्ष विरोधात् प्रत्यक्षेण हि आत्मा 'स्वदेहे एव सुखादि स्वभावतया प्रतीयते, न देहान्तरे परसम्बन्धीनि, नाप्यान्तराले।अयमात्मा सुखदुःखादयोऽप्यात्मगुणाज्ञानवत् स्वप्रकाशा एव। धर्माधर्मौ तु नात्मगुणौ तयोरचेतनपुद्गलद्रव्यरूपत्वात्।जैनानांमते चैतन्यं ज्ञानरूपमेवात्मलक्षणत्वेन सनातनात्मधर्मः।सांख्यपातञ्जलमतयोश्चैतन्यमात्मस्वरूपमेव नित्यं निर्लेपं निर्गुणं विभु च। अद्वैत वेदान्तमते ज्ञातृत्व भोक्तृत्वादिकमात्मनोऽतात्विकमेव अध्यासजन्यम्। नित्यशुद्धमुक्तोऽप्यात्माऽध्यासजन्यम्। नित्यशुद्धमुक्तोऽप्यात्मा ऽध्यासवशादेव देहादिसंघात भोक्तृत्वादिकं भजते। अन्तः करणाद्युपाधिभेदाज्जीवानां भेदेऽपि न स्वरूपेणात्मा भिन्नः किन्तु एक एव। उक्तञ्च———

एकएवहि भूतात्मा भूते-भूते व्यवस्थितः।<br>
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।।५७

अपि च बुद्धिप्रतिबिम्बित चिदाभास एवोपाधि बुद्धि पक्षपातितत्वात् संसारं लभते, प्रमाता कर्ता च भवति। तत् साक्षित्वेनावस्थित चिदात्मा कूटवत् निर्विकारास्तिष्ठतीति कूटस्थशब्देनाभिधीयते। घटादीनां प्रमातृचिदाभास ग्राह्यत्वेऽपि अन्तःकरणस्य ज्ञानसुखदुःखाद्यन्तःकरणस्य ज्ञानसुखदुःखाद्यन्तःकरणधर्माणामज्ञान ततूकार्यप्रतिभासिक रजतादीनां च साक्षि ग्राह्यत्वमेव। अद्वैतमते चैतन्यं आत्मस्वरूपमेवाद्वितीयम् अखण्डमनसं विभुस्वप्रकाशं नित्यं बुद्धिवृत्तौ प्रतिबिम्बनात् ज्ञानरूपं भवति। चार्वाकादिमते तु चैतन्यंजन्यमेव।देहसमवेतमिन्द्रिय समवेतं वा। क्षित्यादिचतुर्भूतमेलनजं मद शक्तिवद्भौतिकमेव चैतन्य तद्विशिष्ट देह एवात्मा——

चतुर्भ्यः खलु भूतेभ्यश्चैतन्य मुपजायते।
किण्वादिभ्यःसमेतेभ्योद्रव्येभ्योमदशक्तिवत्।।
अहंस्थूलःकृशोऽस्मीतिसामानाधिकरण्यतः।
देहःस्थौल्यादियोगाच्चसएवात्मा नचापरा।।५८

तत्र केचिद्देहं, केचिदिन्द्रियं केचिन्मन एवात्मानं मन्यन्ते।चार्वाका उत्तरोत्तर सूक्ष्मदर्शिनः सर्वथापिभौतिकएवात्मा चैतन्यमपि भौतिकमेव। तेषां खण्डनं तु न्यायवैशेषिक जैनमीमांसक 'सांख्यपातञ्जल वेदान्तिभिः सर्वैरेव कृतमिति ग्रंथविस्तारयान्नोपलिख्यते।

# ज-मनोविज्ञाने इन्द्रिय तथा शरीरनिरूपणम्।

वेदान्तोपनिषदिच पञ्चज्ञानेन्द्रियाणां मनसश्चान्तःकरणरूपेणोल्लेखो दृश्यते। वृहदारण्यकोपनिषदि 'दशेमेपुरुषेप्राणा आत्मैकादश इति। अत्रात्मशबदेनान्तःकरणमुक्तमिति। तार्किकमते तु पञ्चैवेन्द्रियाणिरूपादिपञ्चविषयग्राहकाणि। तथाहि घ्राणरसन-चक्षुस्त्वक्-श्रोत्राणिन्द्रियाणि भूतेभ्यः।६० गौतमीयसूत्रस्यभाष्ये उक्तं च वात्स्यायनेन 'जिघ्रत्यनेनेतिघ्राणं रसं गृह्णातीति। रसत्यनेनेतिरसनं रसं गृह्णातीति। वायुः स्पर्श व्यञ्जकः, आपोरस व्यञ्जिकाः तेजारूपव्यञ्जकम् पार्थिवं किञ्चिद् द्रव्यं कस्यचितूद्रव्यस्य गंधव्यञ्जकम्।वैशेषिकदर्शने तत्र पुनः पृथिव्यादि कार्यद्रव्यं त्रिविधं शरीरेन्द्रिय विषयभेदात्।६१ भूयस्त्वाद् गंधत्वाच्च पृथिवी गंधज्ञाने प्रकृतिः। तथापस्तेजो वायुश्च रसरूपस्पर्शाविशेषात् इत्यादि सूत्रैः पृथिव्यपतेजो वायूनांभूतानां यथाक्रमं घ्राण-रसन-चक्षु–स्त्वगिन्द्रिय कारणत्वमुक्तम्। श्रोत्रं तु कर्णविवरवर्त्याकाशमेव। सांख्यमते पञ्चकर्मेन्द्रियान्तभविन एकादशविधत्वमिन्द्रियाण्युक्तम्। एतानि सर्वाण्याहंकारित्वाद् भौतिकानि। एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि च। रामानुजमते सात्विकाहंकारोपादानकानिन्द्रियाणि एकादश

एव। बौद्धमते इन्द्रियाणि रूपस्कंधेऽन्तर्भूतानि। चक्षुरादीनिपञ्चेन्द्रियाणि मनश्चेन्द्रियमेव।तत्र पञ्चमेन्द्रियाणां विषयाः समकालीनाः भवन्ति। मनसस्त्वतीतो विषयः। एकेनापि चक्षुषा दर्शनं भवति, द्वाभ्यां शुद्धतरम्। त्रिभिर्घ्राणरसन त्वग्भिः प्राप्तानामेव ग्रहणं भवति।अक्षिमनः श्रोत्राणित्वप्राप्त्यार्थ विषयाणि। शांकरवेदान्तमते तु एकादशएवेन्द्रियाणि सूक्ष्मभौतिकानि न तु अधिक न्यून संख्यकानि। शब्दस्पर्शरूपरसगंधविषयाः पञ्चबुद्धीन्द्रियाणि वचन-दान-विहरणोत्सर्गानन्दाः पञ्चकर्मभेदास्तदर्थानि न पञ्चकर्मेन्द्रियाणि। तस्मात् नेन्द्रियाणि सांख्यादि मत इव अहंकाराणि न वा तार्किकादि मत इव अतीन्द्रियत्वेऽपि स्थूलभौतिकानि न वा सौगतमतइव गोलकरूपाणि भाट्टमत इव गोलक शक्ति रूपाणि वा अपितु अपञ्चीकृत सूक्ष्मभौतिकान्येव। उक्तं च श्रीनिवासदासेन——

इन्द्रियं द्विविधं ज्ञानेन्द्रियं कर्मेन्द्रियञ्च। ज्ञानप्रसरण शक्तमिन्द्रयं ज्ञानेन्द्रियम्। तत् षोढा-मन-श्रोत्रचक्षुर्घ्राणरसनात्वम् भेदात्। स्मृत्यादि करणमिन्द्रियं मनः। शब्दादिपञ्चके शब्दमात्रग्रहणशक्तमिन्द्रियं श्रोत्रम्। तन्मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्तिः। द्विजिह्वानां सर्पादीनां नयन वृत्तिः। एवं रूपग्रहणमात्र शक्तमिन्द्रियं चक्षुः। गंधमात्रग्रहण शक्तमिन्द्रियं चक्षुः। गंधमात्रग्रहण शक्तमिन्द्रियं घ्राणम् नासाग्रवृत्तिः। रसमात्रग्रहण शक्तमिन्द्रियं रसनेन्द्रियम् जिह्वाग्रवर्ति। स्पर्शमात्रग्रहण शक्तमिन्द्रियं त्वगिन्द्रियम् सर्वशरीरवृत्तिः।नखदन्तकेशादिषु प्राणमाद्यन्तारतम्यात् स्पर्शानुलम्भः। श्रोत्रादिन्द्रियाणां भौतिकत्व प्रतिपादनं भूताप्यायितृत्वेनौपचारिकम्। विज्ञानसाधनत्वादिन्द्रयाणि विज्ञानमुच्यते।६२ इन्द्रियेभ्यः प्राणस्यपृथक श्रवणात् प्राणव्यतिरिक्तानां एव इन्द्रियत्वमवगम्यते। जैनाः केवलं पञ्चमिन्द्रियाणि एव वदन्ति तानि च स्पर्शनरसनघ्राणचक्षुः श्रोत्राणि।६३ पिपीलिकादीनां स्पर्शनरसनेघ्राणाधिके इति ते त्रीन्द्रियः। भ्रमरादीनां स्पर्शनरसनघ्राणादीनां चक्षुराधिकानीति ते चतुरिन्द्रियाः। मनुष्यादीनां स्पर्शनरसनघ्राणचक्षूंषि श्रोत्रादीनि पञ्चेन्द्रियाणि विभिन्न प्राणिनामिन्द्रियाणां संख्यान्यूनाधिक्यं बोध्यम्। आयुर्वेदमते त्विन्द्रियाणि दश एव। तथोक्तं चरके पञ्चबुद्धीन्द्रियाणि तद्यथा स्पर्शनं रसनं घ्राणं दर्शनं श्रोत्रमिति। पञ्चकर्मेन्द्रियाणि तद्यथा हस्तौपादौपायुरुपस्थाजिह्वाचेति।६४ आयुर्वेदमते पञ्चज्ञानेन्द्रियाणि प्रत्येकं पाञ्चभौतिकान्येव। तदुक्तं चक्रपाणिना पञ्चेन्द्रियद्रव्यानि खं वायुर्ज्योतिरापोभूरिति।६५ वस्तुतः आयुर्वेदो सांख्यमतमंशशतश्च वैशेषिकंमतमनुसरति। दृश्यते हि यत्रशरीरं तत्रसर्वत्रशरीर कार्यम्। न च शरीरस्यसर्वगतत्वमस्ति। अर्थेन्द्रियाणि सर्वगतानिपरोपाधिगमनकत्वादाकाशवत्। यथा आकाशस्यगमनं घटाद्युपाधिकं तथेन्द्रियाणां शरीरोपाधिकं गमनमितिचेन्न। प्राणोपाधिकं हि तेषां चलनम्। किञ्चेन्द्रियाणां सर्वगतत्वे युगपत् सर्वविषयोपलब्धिः स्यात्।तस्मात् इन्द्रियाणि सर्वगतान्येव।

अस्मिन् मनोवैज्ञानिके अनुशीलने मनोऽधितिष्ठतस्तत् शरीरमवश्यमेव निरूपणीयम्———
आत्मानं रथिनंविद्धिशरीरं रथमेव तु।
बुद्धिंतुसारथिंविद्धि मनः प्रग्रहमेव च।।६६
अत्रात्मा रथिन, शरीरंरथरूपत्वेन वर्णितम्। क्वचिच्च शरीरेहृदये ब्रह्मणोविशेषतोऽधिष्ठानात्शरीरंब्रह्मपुरत्वेनाधिष्ठितम्।६७
गर्भोपनिषदिशरीरवर्णनमित्थं निरुपितं वर्तते———
पञ्चात्मकंपञ्चसुवर्तमानंषडाश्रयंषड्गुणयोगयुक्तम्।
तत्सप्तधातुत्रिमलंद्वियोनिचतुर्विधमाहारमयंशरीरम्।।६८
अथेदंशरीरं पाञ्चभौतिकम् षड्रसयुक्तंरसशोणितमांसमेदास्थिमज्जा-शुक्रसप्तधातुविशिष्टवायुपित्तकफत्रिमलं स्त्रीपुरूषोत्पन्नं चर्व्य-चोष्य लेह्य पेय चतुर्विधाहारपुष्टं शरीरमित्यर्थः। गर्भेउत्पत्तिप्रकारश्चापिश्रूयते।६९ एकरात्रोषितं कलिलं भवति। सप्तरात्रोषितं बुद्बुदं भवति। अर्द्धमासाभ्यान्तरेणकठिनोभवति, मासद्वयेनशिरःसम्पद्यते। मासत्रयेणांगुल्यजठरकटिप्रदेशो भवति। षष्ठेमासेजीवेनसंयुक्तो भवति। अष्टमेमासेसर्वसम्पूर्णोभवति। पितूरेतोऽरिक्तात् पुरूषोमातूरेतोऽरिक्तात् स्त्रियो भवन्ति। व्याकुलितमनसोऽन्धाः खञ्जाःकुब्जाःवामनाः भवन्ति। अथमात्राऽशितपीतनाडीसूत्रगततवेन प्राणाऽप्यायते। अथनवमेमासे सर्वलक्षणसम्पूर्णोभवति। एवं पञ्चानां भूतानां संयोगे शरीरं भवति। गंधक्लेदंपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्। स्थूलदेहावच्छेदेन- सूक्ष्मशरीरस्यैव सुख-दुःख भोगोभवति। सर्वसम्मतत्वात्।७० एकादशेन्द्रियाणि पञ्चतन्मात्राणि बुद्धिश्चेति सप्तदश लिंगशरीरं बोध्यम्। तच्चसर्गादौसमष्टिरूपकमेव भवतीत्यर्थः। लिंगदेहेबुद्धेरेवप्राधान्येन लिंगदेहस्यभोग इत्युक्तम्। अतोभोगायतनत्वात् तस्यैवमुख्यं शरीरत्वम् तदाश्रयतया च स्थूलशरीरस्येतिबोध्यम्। अपरमपिशरीरमतिवाहिकं नाम सांख्यशास्त्रे निरुपितमिति विज्ञानभिक्षुमतम्।अतिवाहिकशरीरे च प्रमाणम्———

अंगुष्ठमात्रपुरूषोऽन्तरात्मा।
सदाजनानांहृदये सन्निविष्टः।।७०
अंगुष्ठमात्रं पुरूषं निश्चकर्ष बलाद् यमः। इतिश्रुतिस्मृतिः।उक्तं तेनैवान्यत्र"तल्लिंगशरीरं तद्वतेऽधिष्ठानं विना न तिष्ठति।यथा छाया निराधारा न तिष्ठति। यथा वा चित्रमित्यर्थः। वेदान्तमतेस्थूल-सूक्ष्म-कारणभेदेन शरीरत्रयमभिहितम्। तत्र पितृमातृजं स्थूलशरीरं पाञ्चभौतिकम्। सूक्ष्मशरीरं तु लिंगाख्यं ज्ञानेन्द्रियकर्मेन्द्रिय प्राणमनोबुद्धिरूपावयव युक्तं संस्कारदृष्ट्याद्याश्रयोऽपञ्चीकृत सूक्ष्म पञ्चभूतजन्यम्। कारणशरीरन्तु व्यष्ट्यज्ञानरूपमविद्याख्यं कारणावस्था संस्कार रूपबीजाधारं

सुषुप्तावस्थत्वादानन्दमयञ्च। इदमेवकारणशरीरं सुषुप्ति प्रलयादिकाले बुध्यादेर्विलीनत्वेऽप्यदृष्ट संस्काराद्याश्रयत्वेनानुवर्ततेति न जागरणादौ पुनस्तेषां संस्कारादीनां कार्योत्पत्त्यनुपत्तिः। अत एवाह श्रुतिरपि त इह व्याघ्रो वा सिंहोवा वृकोवा वराहोवा कीटोवा पतंगोवा दंशोवा मशको वा यद्-यद् भवन्ति तदाभवन्ति इति।७१ मनोविज्ञानस्याध्ययने इदं सूक्ष्मकारण शरीरद्वयमेव प्रधानतया आलोचनीयम्। अनयोः स्मृति जनक संस्काराद्याश्रयतया सूक्ष्मशरीरमेव पाश्चात्यानां फ्रायडप्रभृतिमनोवैज्ञानिकानां प्रिकान्सासमावकन सासाख्ययोर्मनस्तरयोस्तुल्यं भवति। कारणशरीरञ्च संस्कारादृष्टादि बीजभूताज्ञानरूपतया तेषामानकनसासाख्य मनस्तरेण तुलनीयं भवति। प्रभाकरमतेऽपि षडिन्द्रियाणि यस्मिन्नायतन्ते। तदिन्द्रियायतनं शरीरं जडायुजाण्डज संस्वेदजभेदभिन्नं त्रिविधम्।उद्भिजं शरीरं न भवत्येव इन्द्रियायतनत्वे प्रमाणाभावात्। भाट्टमते वृक्षादेरपि शरीरत्वादुद्भिजमपि शरीरमिति। चातुर्विध्यम्। तत्र गंधवतीपृथिवी, सापुनर्धराधर महीरुहादिरूपाशरीरघ्राणेन्द्रियरूपाच। तत्रात्मभोगायतनंशरीरम्। तत्तुजरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्विधम्। तत्र जरायुजं मनुष्यादिशरीरमिति। रामानुजीयदर्शनमतेऽपि स्थूलशरीरं पाञ्चभौतिकमेव। जैनदर्शनमते शीर्यन्तेति शरीराणि। तत्र स्थूलशरीरमेवौदारिकम्। वैक्रियिकादि शरीराणि तु उत्तरोत्तरं सूक्ष्म-सूक्ष्मतराणि।

## झ-मनोधर्मनाडीचक्रादीनां निरूपणम्।

दार्शनिकानां मते आत्मा निर्गुणः परिणामरहितश्च तेषांमते सर्वे आन्तरधर्माः परिणामाव्यापारश्च ज्ञानसुखादयोमनसोऽन्तःकरणस्यैव। अतस्ते मनोधर्मत्वेन मनोवृत्तिरूपेणेवोल्लिख्यन्ते।ये तु नैयायिक, वैशेषिक,मीमांसक,जैनादयः आत्मानमेव कर्तारं सगुणं च मन्यन्ते। ते सर्वानान्तरधर्मानात्मन एव गुणरूपेण धर्मरूपेण वा स्वीकुर्वन्ति।वृहदारण्यकोपनिषदि स्पष्टतया एवोक्तम्— मनसा हि एव पश्यति मनसाश्रृणोति, कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वमनएवइति।७२ ह्रीः,लज्जा,धीः,प्रज्ञा,भीः-भयम, इत्येतत् सर्वमनएव मनसोऽन्तःकरणस्वरूपाण्येतानिइति भाष्ये व्याख्यानमुक्तम्। उक्तं च भाष्ये-'मनश्चैतदेकमनेकधा। एतेनान्तःकरणे नैकेन चक्षुर्भूतेनरूपं पश्यति,श्रौतसूत्रेनश्रृणोति, वाग्भूतेन वदति,स्वेनैवविकल्पनारूपेणमनसा विकल्पयतिहृदयरूपेणाध्यवस्यति।७३ प्रज्ञानरूपस्य ब्रह्मणरूपस्यउपलब्ध्यर्थायाःअन्तःकरणवृत्तयोबाह्यान्तरवर्त्तिविषय- विषयस्तथाएवमैतरेये पठिताः संज्ञानमाज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्म- नीषाश्रुतिस्मृतिःसंकल्पःक्रतुरसुः कामोवशेति।७४ एताःविभिन्नाःअन्तः- करणवृत्तयो मनोधर्मावा

शांकरभाष्येव्याख्याताः। संज्ञानं संज्ञप्तिश्चेतनभावः। अज्ञानमाज्ञप्तिरीश्वरभावः। विज्ञानंकलादिपरिज्ञानं, प्रज्ञानंप्रज्ञप्तिःप्रज्ञता। मेधाग्रंथधारणसामर्थ्यम। दृष्टिरिन्द्रियद्वारासर्वविषयोपलब्धिः। धृतिर्धाधारणमवसन्नानांशरीरेन्द्रियाणां ययोत्तंभनं भवति। मतिर्मननम्, मनीषातत्रस्वातन्त्र्यम् जुतिश्चेतसोरूजादिदुःखित्वभावः। स्मृतिःस्मरणम्। संकल्पःशुक्लकृष्णादिभावेनसंकल्पनं रूपादीनाम्। कतुरध्यवसायः, असुःप्राणनादिजीवनकिकयानिमित्तावृत्तिः। कामोसन्निहितविषयाकांक्षा तृष्णा,वशः स्त्रीव्यतिकराभिलाषइति। प्रश्नोपनिषदिचान्तःकरणं मनोबुध्यहंकारचित्तरूपेणचतुर्धाविभज्य तेषांमननबोधनाहंकारचेतनरूपवृत्तिभेदेन मन्तव्यादिविषयभेदःप्रदर्शितः।७५ वैशेषिकाहि ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नानां षण्णां ज्ञानविततिरूपत्वेन ज्ञानान्तर्भावस्योक्तत्वात्। ज्ञानमेवविष- यग्रहणरूपंप्रकाशते, न सुखदुःखं वा। उक्तं च शंकरमिश्रेण— 'यद्यपीन्द्रियं मनो न साक्षात् प्रयत्नविषयस्तथापिमनोवहनाडीगोचरेण प्रयत्नेनमनसि कर्मात्पोपपत्तिर्द्रष्टव्या। नाड्यास्तु त्वगिन्द्रिय ग्राह्यत्वमङ्गीकर्तव्यम्। अन्यथा प्राणवहनाडीगोचरेण प्रयत्नेनाशितपीताद्य- भ्यहरणमपि न संभवेत्। उपनिषदि शरीरस्था बहवोनाड्यः श्रूयन्ते यासु प्रणालिषु प्राणस्य मनसश्च प्रचारा वायुपित्तादीनाञ्चोर्ध्वाधः सञ्चाराः भवन्ति। तासु काश्चित् सूक्ष्माः काश्चित् सूक्ष्मतराःभवन्ति। काश्चित् सूक्ष्मतमाः भवन्ति। काश्चित् प्रधानाः काश्चित्प्रधानाश्च भवन्ति। अथ प्रधानाःनाड्या एकाधिकं शतं भवन्ति। तासां नाडीनां एकैकसां पुनः द्वासप्ततिः सहस्त्राप्यप्रधानाः प्रतिशाखानाड्यो विद्यन्ते। तासुव्यानरूपेण प्राणश्चरति। तदुक्तं प्रश्नेहृदिस्येष आत्मा अत्रैतदेकाशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वासप्ततिः प्रतिशाखानाडी सहस्त्राणि भवन्त्यासु व्यानश्चरति।७६ वृहदारण्यके—

"ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्त्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिंगलस्य हरितस्य लोहितस्यपूर्णा अथ यत्रैनं घ्रान्तीव जिनन्तीव इत्यादि।७७ गर्भोपनिषदि च स्नायुशतं सप्तशिराशतानि इति शतं स्नायवः सप्तशतानि च उल्लिखिताः।७८ एवं सर्वत्रैवोपनिषदि हृदयमेव नाडीनां केन्द्रतया मूलमभिहितम्। यत्तु चरकसुश्रुताद्यायुर्वेदग्रंथे नाभिरेवशिरानांमूलमि- त्याभिहितम् तन्नाडीशिराणां भेदप्रयुक्तं न वेति चिन्त्यम्। हृदयन्तु चेतनाऽधिष्ठानात्वेन आयुर्वेदेऽपि स्वीकृतम्। हृदयन्तु चेतनाऽधिष्ठानमेव।७९ आयुर्वेदे तु नाडीनां स्पष्टतरं विवरणं लभ्यते। सुश्रुते चतुर्विंशतिर्धमन्यो नाभिप्रभवाभिहिताः। वातपित्तश्लेष्मानां पुनः सर्वशरीर चराणां सर्वाणिस्रोतांसि अयनभूतानीति। तत्र मनोवहनाडीनां मनोवहस्रोतसाञ्चोल्लेखो विद्यते। यथोक्तं चरके——

मनोवहानांपूर्णत्वा- द्दोषैरतिबलैस्त्रिभिः।
स्रोतसांदारुणान्स्वप्नान्कालेपश्यसिदारुणे।।८0

उक्तं च चक्रपाणिनाटीकायां 'यथैतत् स्वप्नदर्शनं भवति तदाह मनोवहानामित्यादि। मनोवहानिस्रोतांसि यद्यपि पृथक्नोक्तानि तथापि मनसः केवलमेवेदं शरीरमयनभूतमित्यभिधानात् सर्वशरीर स्रोतांसि गृह्णन्ते। विशेषेण तु हृदयाश्रितत्वात् मनसस्तदाश्रिता दशधमन्यो मनोवहाभिधीयन्ते।८१ तस्माद् ज्ञायते यत् हृदयाश्रिता दशधमनीविशेषा एव मनोवहा नाड्य इत्यभिधीयन्त। सर्वशरीरे एव मनसः प्रचारात् सर्वशरीरश्रोतांसि मनोवहस्रोतांसीति उच्यते। उक्तं चान्यत्र चरके उन्मादहेतुनिरूपणे व्याधिवेगसमुद्भावितोपहतमनसां वा कामक्रोध लोभहर्षभयशोकचिन्तोद्वेगादिभिःपुनरभिधाताभ्याहतानां वा मनस्युपहते बुद्धौच प्रचलितायामभ्युदीर्णादोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांसि आवृत्य जनयन्त्युन्मादम्। उन्मादं पुनः मनोबुद्धिसंज्ञाज्ञानस्मृतिभक्तिशीलचेष्टाहारविभ्रमं विद्यात्।८२ मनोवहनाड्याः प्रत्यक्षतया बुभुत्सुषाजनितेन प्रयत्नेन तत्र क्रियातोत्पद्यते। क्रियया च नाड्यां वेगोवेगे च सति स्पर्शवद् वेगवद् नाडीसंयोगादाभिहितम् नुन्नं वा मनोऽभिमत विषयग्राहिणोन्द्रियेण सम्बध्यते। न च मनोवहनाडीगोचरप्रयत्नानुपपत्तिः जलयानादौ तत् तत् नाडीगोचर प्रयत्नाभ्युपगमात्। एवमेवायुर्वेदे रूपरसगंधस्पर्शशब्दवहानामपि नाडीनां वर्णनं लभ्यते। तथाचोक्तंतासांच नाभिप्रभवाणाम् धमनीनामूर्ध्वगा दश दश चाधोगामिन्यश्चचतस्रास्तिर्यग्गाः ऊर्ध्वगाः शब्दस्पर्शरूपरसगंधप्र- श्वासोच्छ्वासजृम्भितक्षुब्धसितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति। एतेषु मनोवहनाडीनां शब्दस्पर्शरूपरसगंधवहनाडीनां च निरूपणं मनोविज्ञाने विशेषतयोपयोगि भवति। तैरेवनाडिभिः नानाविधव्यापारे मनसः सञ्चारात् शब्दस्पर्शरूपादिप्रत्यक्षे च तैरेव नाडिभिः चेतनास्थाने हृदये आज्ञाचक्रेवा रूपादीनां वाहनात्। शिराणाञ्च विस्तारः सुश्रुते वर्णितः। यथाव्याप्नुवन्त्याभिहितो देहं नाभितः प्रसृतः शिराः।८३ तासां वातवाहिन्योदश, पित्तवाहिन्योदश, कफवाहिन्योदश, दशरक्तवाहिन्यः भवन्ति।८४ अत्रशिराणामुपयोगः सप्तशतानां शिराणां चत्वारिंशतः प्राधान्यम् तेषां व्यापाराश्च स्पष्टतयाभिहिताः। शाण्डिल्योपनिषदि चतुर्दशसूक्ष्मा विशेषतो योगिभिर्ज्ञेयः नाड्यः पठ्यन्ते। ताश्चनाड्यः कुण्डलिनीमाश्रिताः। नाभेस्तिर्यगधोर्ध्वं कुण्डलिनीशक्तिर्भवति। हृदयाकाशे महोज्वलाज्ञानरूपाभवति। मध्यस्थकुण्डलिनीमाश्रित्यमुख्यः नाड्यश्चतुर्दशभवन्ति। इडा,पिङ्गला,सुषुम्ना,सरस्वती,वारुणी,पूषा,हस्तिजिह्वा,यशस्विनी,विश्वोदरी,कुहू,शंखिन,पयस्विनी,अलम्बुषा,गांधारीति नाड्याश्चतुर्दश भवन्ति। तासां चतुर्दशनाडीनामवस्थानविवरणञ्च प्रदत्तम्। तन्त्रशास्त्रेऽपि षट्चक्र निरूपणादौ मेरुदण्डाभ्यान्तर स्थितानि बहूनिचक्राणि पद्माकाराणि ततसंलग्नाः नाड्यश्च वर्णितानि। एवं सुषुम्णायामुपर्युपरि स्थितानि स्वाधिष्ठान,मणिपूर,अनाहत,विशुद्धाज्ञाख्यपद्मानि निरूप्याज्ञाचक्रे मनसः स्थितिमाह एतत् पद्मान्तराले मनः सूक्ष्मरूपेण निवसति।

## ञ-ज्ञानात्मक मनोवृत्ति तथा संशयनिरूपणम्।

अन्तःकरणवृत्तीनां प्रायः त्रयो विभागाः संभवन्ति। 1-ज्ञानात्मकवृत्तयः 2-प्रयत्नात्मकवृत्तयः 3-भावात्मकवृत्तयः बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति ज्ञानम्। शिवादित्येन बुद्धित्वसामान्यवती आत्माश्रयप्रकाशोबुद्धिरिति ज्ञानलक्षणमुक्तम्। अर्थप्रकाशोबुद्धिरिति माधवसरस्वत्या वैशेषिकसम्मतज्ञानलक्षणतुक्तम्। केशवमिश्रेणापि तदेव लक्षणमुपन्यस्तम्। सर्वव्यवहारहेतुर्गुणोबुद्धिर्ज्ञानमिति तु नव्याः।८६ आहारविहाराय ये सर्वेव्यवहारास्तेषामसाधारणकारणंज्ञानमेवेत्यर्थः। स्मृतिरपिज्ञानं स्वोत्पत्यर्थं सुषुप्तौ पुरीततिनाड्यां प्रविष्टस्य मनसस्तादृश संयोगाभावान्न किञ्चिदपि ज्ञानं संभवति।८७ सविकल्पकज्ञानमात्रं चानुव्यवसायात्मकेन मानसप्रत्यक्षेण ज्ञायते। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्वन्तःकरणग्राह्या इति। यथा घटज्ञानवानहमिति, घटमहंजानामीति। अपितु सर्वं च ज्ञानं निराकारमेव। न तु ज्ञाने अर्थेन स्वस्याकारो जन्यते। साकारज्ञानवादनिराकरणात्। घटज्ञानवानाहम् इत्येतन्मात्रं गम्यते, न तु ज्ञानवानहम् इत्येतावन्मात्रम् ज्ञायते।८८ शांकरवेदान्त तथा सांख्ययोगमतेषु स्वादृष्टविशेषवशात् विषयेणेन्द्रियद्वाराऽन्तःकरणसंयोगे जाते सत्वप्रधानत्वात् स्वच्छायान्तःकरणस्य बुद्धेर्विषयाकारा वृत्तिर्जायते। आत्मचैतन्य प्रतिबिम्बविशिष्टा सैवज्ञानमिति बुद्धिपरिणामत्वमेव ज्ञानस्य न त्वात्मगुणत्वम्। अद्वैतवेदान्तमते मुख्यंज्ञानं प्रकाशस्वभावं चैतन्यमेव। तथापिचैतान्याभिव्यक्त वृत्तिभिरेवज्ञाननाशात् विषयाकारग्रहणाच्च वृत्तिज्ञानमेवास्मांकम् प्रधानतः आलोचनाविषयं मनोविज्ञानशास्त्रे। अद्वैतवेदान्तिनां मते वृत्तिप्रतिफलितचैतन्येन चिदाभासेन वाविषयस्फुरणमेव फलमुच्यते। सांख्ययोगयोस्तु प्रमाता चेतनः शुद्धः द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः स च पुरुषो बुद्धेः प्रतिसंवेदी८९ इत्यादिना प्रमाण फलस्य बोधस्य पुरुष निष्ठत्वमुक्तमिति विशेषः। भाट्टमीमांसकमते बोधाबोधात्मकस्यात्मनो ज्ञानगुणकत्वेऽपि, न ज्ञानस्य तार्किकमतवदात्म गुणत्वेऽपि सर्वे प्रत्यया यथार्थाः प्रत्ययत्वात् घटादिप्रत्ययवदित्यनुमानेन सर्वज्ञानानां यथार्थत्वमभिमतमित्येतत् सर्वं भ्रमनिरूपणे स्फुटीभविष्यति। तन्मतेबोधबोधात्मकस्यात्मनो गुणकत्वेऽपि न ज्ञानस्य तार्किकमतवदनुव्यवसायगम्यत्वं न वा सांख्यवेदान्तमतवद् साक्षिभाष्यत्वं प्रभाकरमतवद्वा स्वप्रकाशत्वमपि तु अर्थाहित ज्ञातताख्य प्राकट्यान्यथानुपपत्ति गम्यत्वमेव। बौद्धमते विज्ञानं प्रतिविज्ञप्तिरित्युक्तम्।९० जैनदर्शनमते जानाति ज्ञायतेऽनेन ज्ञातिर्वा ज्ञानमिति। शाक्तानां मते शुद्धचित्स्वरूपस्यात्मनः या चलावस्था सैव मन उच्यते। तस्यैवमनसोऽवस्था द्वयभेदो ज्ञानरूपः प्रकाशामर्शसंज्ञकः। तत्र प्रकाशो निर्विकल्पकज्ञानम् विमर्शः सविकल्पकज्ञानम्। तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थ इति नव्याः। सर्पत्वाभाववति रज्जौ

सर्पत्वप्रकारकानुभवः अयं सर्प इत्यनुभवोऽयथार्थानुभवः। स एव अप्रमा इत्युच्यते। वैशेषिकभाष्यकारेण प्रशस्तपादेन तु सामान्यतो ज्ञानस्य द्विविधत्वमुक्त्वा अविद्याया अयथार्थानुभवरूपायाश्चतुर्विधत्वमुक्तम् यथोक्त तत्र अविद्या चतुर्विधा संशयविपर्ययानध्यवसाय स्वप्नलक्षणा। शिवादित्येन त्वयथार्थानुभवो द्विविधः 'यथाह अनवधारणज्ञानं संशयः। अवधारणरूपातत्वज्ञानं विपर्ययः। तर्कस्वप्नौ संशय विपर्ययावेव इति आहार्य ज्ञानरूपस्य तर्कस्यापि संशयेऽन्तर्भावः उक्तः।स्वप्नस्य तु विपर्ययेऽन्तर्भावः यद्यपि वैशेषिकानुसारिभिः शिवादित्यातिभिः तर्कस्य संशयेऽन्तर्भावः उक्तस्तथापि नैयायिकैस्तस्य पृथक् परिगणनंकृतम्। नव्यन्यायमते संशयविपर्यय तर्कभेदादय यथार्थनुभवस्त्रिविधः'६१ जैनदर्शन मते मिथ्या दृष्टौजीवे मिथ्यादर्शनेन सहचरितं ज्ञानं संशयविपर्ययानध्यवसायात्कत्वेन मिथ्या भवति।

संशयनिरूपणे प्रायः मीमांसकजैनवेदान्तिबौद्धसांख्ययोगिनां प्रायशः ऐकमत्यमेव। बौद्धमते अनियतार्थः संशयः स्वीकृतः।"आभ्यां प्रमाणाभ्यामन्येन च ज्ञानेन प्रदर्शितोऽर्थः कश्चिदनियतो भावाभावयोः यथा संशयार्थः न च भावाभावाभ्यां युक्तोऽर्थो जगत्यस्ति।वैशेषिकदर्शने सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः।"६२ साधारणधर्मस्यप्रत्यक्षज्ञानात् विशेषस्यैककोटिव्याप्यस्यज्ञानात् कोटिद्वयस्यस्मृतेः संशयोभवतीत्यर्थः। प्रशस्तपादभाष्यानुसारेण संशयलक्षणं तु तद् व्याख्यान रूपं 'प्रसिद्धानेकविशेषयोः सादृश्यमात्र दर्शनादुभय विशेषानुस्मरणधर्माच्च किं स्विदित्युभयालम्बी विमर्शः संशयः इत्युक्तम्। तस्यविभागः द्विविधः अन्तर्बहिश्च। तत्राप्रत्यक्ष विषये तावत् साधारण लिंगादर्शनादुभय विशेषानुस्मरणाद् धर्माच्च संशयोभवति। यथाऽटव्यां विषाण मात्र दर्शनात् गोर्गवयो वेति। प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्वता मात्र सादृश्य दर्शनात् उभयत्राकृष्यमाणस्यात्मनप्रत्ययो दोलायते किन्तु खल्वयं स्थाणुः स्यात् पुरुषोवेति स्थाणुत्वपुरुषत्व कोटिकः। अन्येषां मते द्विकोटिक संशयप्रसिद्धेः स्थाणुर्वापुरुषोवेति संशयश्चतुष्कोटिक स्थाणुत्व -स्थाणुत्वाभाव-पुरुषत्व-पुरुषत्वाभाव कोटिक इत्यर्थः।६३ सांख्यमतेन सामान्याभिधानं संशयः तद्महदादि तच्चकार्य प्रकृतिविरूपं स्वरूपञ्च इत्युक्तेः संशयो भवति। केनधर्मेणकार्य प्रकृति विरूपं केन वा स्वरूपमिति।६४

## त-तर्कविपर्यय-ऊह-विकल्पनिरूपणम्।

नैयायिकैः यथार्थानुभव निरूपणे तर्कस्यविपर्ययात् पृथक परिगाणनं निरूपणञ्चकृतम्। तस्याहार्यज्ञानरूपत्वात् प्रमाणानुग्राहकत्वाच्च

आहार्यज्ञानं हि बह्निर्न स्यात् तदा धूमोऽपिनस्यादिति।प्रमाणानुग्राहकत्वं च व्यभिचारशङ्का निवर्तकत्वेन बह्निविरहिण्यापि धूमः स्यादिति यथाशङ्का भवति। तदा सा बह्निधूमयोः कार्यकारणभावस्य प्रतिसन्धानान्निवर्तते। यद्ययं बह्निमान न स्यात् तथा धूमवान् न स्यात् कारणं विना कार्यानुपपत्तेः।यत्र तु स्वत एव शङ्का नावतरति। तत्र न तर्काऽपेक्षाऽपीति तदिदमुक्तम् तर्कः क्वचिच्छङ्का निवर्तकेति।६५ केशवमिश्रेणाप्युक्तम् स त्रिविधः संशयस्तर्को विपर्ययाश्च।६६ तेन तल्लक्षणमप्युक्तम् तर्कोऽनिष्टप्रसङ्गः। स च सिद्धव्याप्तिकयोर्धर्मयोर्व्याप्यांगीकारेण अनिष्टव्यापक प्रसंजनरूपः। यथ यद्यत्र घटोऽभविष्यत् तर्हि भूतलमिवात्रा द्रक्ष्येतेति। स चायं तर्कः प्रमाणनामनुग्राहकः। अन्यच्च तर्के व्याप्यस्य व्यापकस्य च बाधनिश्चयः कारणमन्यथा बाधनिश्चयाभावे इष्टापत्तिदोषेण तर्कानुपपत्तेरिति।६७ न्यायसूत्रे गौतमेनापि तर्कस्तत्वज्ञानविषयषोडश पदार्थानां मध्ये परिगणितः।तर्कस्य सामान्यतः प्रमेयपदार्थान्तरगतत्वेऽपि माहात्म्यविशेषात् पृथगुल्लेखः इति वात्स्यायनेनोक्तम्। तर्को न प्रमाणसंगृहीतः न प्रमाणान्तरम् प्रमााणानामनुग्राहकस्तत्वज्ञानाय कल्प्यते। एवमपिज्ञातेऽर्थे कारणोपपत्या ऊहः प्रवर्तते। संशयानन्तरं निर्णयाच्च पूर्वमन्तराजायमान ऊह एव तर्कः। आचार्यविश्वनाथेन नव्यन्यायरीत्या उक्तं——"अविज्ञाततत्वेऽर्थे तत्वज्ञानार्थमिति प्रयोजनकथनम्। कारणं व्याप्यं तस्योपपत्तिरारोपस्तस्मात् ऊह आरोप अर्थात् व्यापकस्य तथा च व्यापकाभाववत्वेन निर्णीते। व्यापारस्याहार्यारोपात् यः व्यापकस्याहार्यारोपः स तर्कः।६८ धूमो यदि बह्निव्यभिचारी स्यात् बह्निजन्यो न स्यात् इत्यनेनव्यभिचारशङ्का निरासे निरंकुशेन व्याप्तिज्ञाने नानुमितिरिति। केचित्तु तर्कस्य स्वीकारेऽपि तस्यानवधारण रूपत्वात् संशयेऽन्तभावमाहुः तथाचोक्तं शिवादित्येन'अनिष्टव्यापकप्रसंजनंतर्कः। तर्कस्वप्नौ संशयविपर्ययावेव तर्कस्तावत् संशय एव यद्यनाग्निस्तर्हिनिर्धूम इत्यत्र यथालिङ्गितत्वेनाग्निमत्वे धूमवत्वं संभवतीत्यपि प्रतीयते।

शिवादित्येन अवधारणारूपातत्वज्ञानं विपर्यय इति विपर्ययलक्षणमुक्तम्। विपर्ययोऽपि प्रत्यक्षानुमान विषय एव भवति। प्रत्यक्षविषये तावत् प्रसिद्धानेकविशेषयोः पित्तकफानिलोप हतेन्द्रियस्यायथार्थालोचनाद् सन्निहित विषयज्ञानज तास्मिन् तदिति प्रत्ययो विपर्ययः।यथा गव्येव अश्वेति। अत्र अस्मिन तदिति प्रत्ययो एव विपर्ययस्य लक्षणम्। अनुमानविषयेऽपि वाष्पादिभिर्धूमाभिमतैर्वह्न्यनुमानम्। गवय दर्शनाच्च, गवयविषाणदर्शनाच्च गौरिति। पातञ्जलयोगसूत्रे विपर्ययो मिथ्याज्ञानम् तद्रूपप्रतिष्ठितम्। अतः संशयोऽपिसंगृहीतः।वैशेषिकानां मते अविद्याख्यस्यायथार्थानुभवस्य संशय विपर्ययानध्यवसाय स्वप्नभेदेन चातुर्विध्यात् अनध्यवसायोऽपि निरूप्यते। अनध्यवसायोऽपि प्रत्यक्षानुमान विषये एव संजायते। गते प्रसिद्धे राजनि कोऽप्यनेन पथागतेति ज्ञानमात्रमनवधारित विशेषमनध्यवसायः। अप्रसिद्धेष्वपरिज्ञानादेवानध्यवसायो यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति।

महानसादौ वह्निधूमयोः सामान्यधिकरणदर्शनेन सकल वह्निधूम विषयक यद् व्याप्तिज्ञानं जायते तदूह एव । यथा चिन्तनं चिन्ता। देशान्तरेकालान्तरे च यावान् कश्चिद् धूमः स सर्वोऽप्यग्निजन्मा ऽनाग्निजन्मा वा न भवतीति। व्याप्तिग्रहणसमूहाख्यं सम्यग्ज्ञानं कथ्यते।उपालम्भानुपालम्भनिमित्तं व्याप्तिज्ञानसमूहः। उक्तं शिवादित्येन उत्कटैक कोटिसंशय ऊहः इति। उक्तं च सर्वदर्शनकौमुद्यां ऊहतर्कौसंशय एवान्तर्भूतौ यथा वीथ्यां पुरुषेणानेन भवितव्यमिति ऊहः। स चानवधारणरूपत्वात् संशय।९९ प्रमाण विपर्यय विकल्प निद्रास्मृतयः१०० इति चित्तवृत्तीनां पञ्चविधत्वकथनात् विकल्पोऽपि विपर्ययवत् तद्भिन्नोऽन्तःकरणवृत्तिविशेष इति पातञ्जलसिद्धान्तः।उक्तं च शब्दज्ञानानुपातीवस्तुशून्यो विकल्पः इति।१०१ चैतन्यपुरुषस्यस्वरूपमिति यदाचितिरेव पुरुषस्तदा किमत्र केन व्यपदिश्यते? तस्माद् विकल्पितः सः धर्मस्तेन चास्ति व्यवहार इति। एवं खपुष्प शशश्रृंग प्रत्यया अपि विकल्पमध्ये प्रवेशनीयाः खपुष्पं नास्तीति प्रत्ययानुरोधेन तादृश प्रत्ययसिद्धेः।१०२ तार्किकैरपि शशश्रृंगमप्रसिद्धमित्यादि व्यवहारानुरोधेन तादृश प्रत्ययं भ्रमरूपं स्वीकुर्वन्ति।

## थ-स्मृति-प्रत्यभिज्ञा सुखदुःखादीनां निरूपणम्।

आत्म मनसोः संयोगविशेषात् संस्काराच्च स्मृतिरिति। भावनाऽसाधारणकारणं ज्ञानं स्मृतिः। भावना हि संस्कार एव। स चानुभव जन्यः स्मृतिहेतुरन्तःकरणधर्मः यथा खल्वात्ममनसोः सन्निकर्षः संस्काराच्च स्मृतिहेतुरेवं प्रणिधानं लिंगादि ज्ञानानि इति। गौतमसूत्रे स्मृतीनां बहुविधान हेतुनुद्बोध कांश्चोलिख्य विचित्रानि निदर्शनानि प्रपञ्चितानि। तानि च प्रणिधान निबंधाभ्यास लिंग-लक्षण-सादृश्य परिग्रहाश्रयाश्रित सम्बन्धनान्तर्य वियोगैककाग्र विरोधातिशय प्राप्ति व्यवधान सुख-दुःखेच्छा द्वेष भयार्थित्व क्रियाराग धर्माधर्म निमित्तेभ्यः तदर्थ स्मृतिकारणम्। नैयायिकैः इन्द्रियाजन्यत्वे सति संस्कारजन्यं ज्ञानं स्मृतितिरित्येव स्मृतिलक्षणं प्राहुः। पातञ्जलमते अनुभव विषयास सम्प्रमोषः स्मृतिरिति स्मृतिलक्षणं कृतम्।१०३ तत्र ग्रहणकारपूर्वा बुद्धिः, ग्राह्याकार पूर्वा स्मृतिः।१०४ सा च द्वयी।भावित स्मर्तव्या च, स्वप्ने भावितस्मर्तव्या चाभावितस्मर्तव्या जाग्रतसमये त्वभावित स्मर्तव्येति। सर्वाः स्मृतयः प्रमाण-विपर्यय-विकल्प-निद्रा स्मृतीनामनुभवात् भवन्ति।स्वप्ने पित्रादेरतीतस्य अनुभूतदेशकालसम्बन्धोऽपि प्रतीयते कल्पितः। सर्वासांवृत्तीनामनुभवाद् भवन्ति। स्वप्नेपित्रादेरतीतस्य अननुभूत देशकालसम्बन्धोऽपि प्रतीयते कल्पितः। सर्वासां वृत्तीनामनुभवादनुव्यवसायात् अनुभवादिति पाठे प्रभावादित्यर्थः। अद्वैतवेदान्तिनः संस्कारमात्रजन्यं ज्ञानमिति स्मृतिः। संस्कारजन्यं इन्द्रियजन्यं वस्तुविषयकं च सोऽयं घटादि ज्ञानं प्रत्यभिज्ञेति। बौद्धानां मते एकस्यवस्तुनोऽभावात् संस्कारजन्यमिन्द्रियजन्यं च ज्ञानद्वयमेव सोऽयमित्यादि प्रत्यभिज्ञायां भासते। एकं स्मृत्यात्मकं अपरं प्रत्यक्षम्।

भूतःकालभूततया गृह्यते। वर्तमानो वर्तमानतयैवार्थस्तूभयानुगत एक एव तथा ग्रहणात्। तस्मादिन्द्रयजन्यत्वात् प्रत्यक्षविशेष एव प्रत्यभिज्ञा। तार्किकैरपि इद्रियजन्यत्वे सति संस्कारजन्यमेकमेव ज्ञानं प्रत्यभिज्ञा प्रत्यक्षप्रमा वि शेषरूपेति प्राहुः।१०५ जैनदर्शनमते दर्शनस्मरण कारकं संकलनं प्रत्यभिज्ञानमिति। अद्वैतवेदान्तिनोऽपि तार्किकवत् प्रत्यभिज्ञानस्य संस्कारेन्द्रियोभयजन्यैक ज्ञानत्वं प्रत्यक्ष विशेष रूपत्वं चाभिमतं। ननु प्रत्यभिज्ञायां सम्प्रयोगः पूर्वानुभूत स्मृतिश्च कारणं ज्ञानद्वय यौगपद्य प्रसंगाभावात् न संस्कारेति। तस्मात् संस्कारेन्द्रियोभय जन्यमेकमेव ज्ञानं प्रत्यभिज्ञा। सुख-दुःखेच्छादि भावात्मक मनोवृत्तीनां अपि मनोविज्ञानशास्त्रे महत्वपूर्ण स्थानं वर्तते। सर्वात्मनां सर्वदानुकूलवेदनीयं सुखं सदाज्ञायमान सत्ताकमेव सुखोत्पत्यनन्तरमहं सुखीत्यादि प्रतीतेरवश्यंभावात्।न हि सुखमन्यार्थमिच्छाविषयोभवति। अपितु स्वार्थमेव सर्वमन्यन्तु सुखार्थमिवेच्छा विषयत्वं भजते। "अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमार्थं मन्यन्ते, न सुखादन्यनिश्रेयसमस्ति, सुखेप्राप्ते चरितार्थः कृत करणीयो भवति।१०६ देहात्मवादिनां चार्वाकाणां मते 'यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्' इत्यादिना तैर्देहेन्द्रिय सुखस्यैव परमपुरुषार्थ तयाऽवधारितत्वात् तेषां मते 'ह्यंगनाद्यालिंगनादि जन्यसुखमेव निरतिसुखं परमपुरुषार्थश्च स्वर्गसुख मोक्ष सुखादीनामसिद्धत्वात्—

अंगनालिंगनाज्जन्यसुखमेवपुमार्थता।
कण्टकादिव्यथाजन्यंदुःखंनिरयउच्यते।
चतुर्भ्यःखलुभूतेभ्यश्चैतन्यमुपजायते।।१०७

परन्तु नैतद् तार्किकादि दार्शनिकानां सम्मताभिमतम्। सर्वत्मनामननुकूल वेदनीयं सुखमिति तर्कशास्त्रसम्मत सुख-दुःखे१०८ सुखस्यात्मेन्द्रिय मनः संयोगजन्य स्वरूपं नोक्तं तथा प्रशस्तपादभाष्येऽनुग्रह लक्षण सुखमिति प्रमेय पदार्थमध्ये परिगणितं न तु सुखम्।सुखं हि फलमध्ये प्रयोजनमध्ये च परिगणितं प्रवृत्तिदोष जनितोऽर्थः फलमिति१०९ गीतायां च प्रकारान्तरेण सुखस्य सात्विक राजसिक तामसिक भेदेन त्रैविध्यमुक्तम्——

'सुखंत्विदानींत्रिविधंश्रृणुमेभरतर्षभ।
अभ्यासाद्रमतेयत्रदुःखान्तंननिगच्छति।।
यत्तदग्रेविषमिवपरिणामेऽमृतोपमम्।।
तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजम्।
विषयेन्द्रियसंयोगात्यत्तदग्रेऽमृतोपमम्।।
परिणामेविषमिवतत्सुखमूमोहनमात्मनः।
निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतम्।।११०

अथसुखं कारण शरीरस्थाविद्यावृत्ति प्रतिबिम्बितात्मस्वरूप सुखमेव।

## द-इच्छाचिकीर्षादि भावात्मक मनोवृत्तीनां निरूपणम्।

अहमिच्छामीत्यादि प्रतीति सिद्धेच्छात्व सामान्यवती आर्थित्व लक्षणा इच्छा। सुखत्वज्ञानं इष्टसाधनताज्ञानं वा इच्छोत्पत्तौ कारणम्। ज्ञानजन्या भवेदिच्छा इच्छा जन्या भवेत् कृतिः। सुखत्वज्ञानजन्या सुखसाधनत्व ज्ञानजन्या दुःखाभावात्वज्ञानजन्या दुःखाभवसाधनत्वज्ञानजन्या च इच्छा भवतीत्यर्थः। इच्छा पुनश्चिकिर्षा द्वारा कृतौप्रयत्ने हेतुर्भवति। तदनन्तरं शरीरचेष्टारूपा क्रिया जायते।

निदुःखत्वेसुखेचेच्छातज्ज्ञानादेव जायते।
इच्छातु तदुपाये स्यादिष्टोपायत्वधीर्यदि।।१११

इच्छाद्विविधा फलविषयिनी, उपायविषयिणीच। फलं तु सुखं दुःखाभावश्च। तत्रफलेच्छां प्रति फलज्ञानम् कारणम्। कामः,अभिलाषः,रागः,संकल्पः,कारुण्यम्, वैराग्यम्, उपधा,भाव, इत्येवमादय, इच्छाभेदाः। मैथुनेच्छाकामः, अभ्यवहारेच्छा अभिलाषः, पुनः पुनर्विषयानुरंजनेच्छा रागः, अनासन्न क्रियेच्छा संकल्पः, स्वार्थमनमपेक्ष्य परदुःखप्रहानेच्छा कारूझयम्, दोषदर्शनात् विषयत्यागेच्छा वैराग्यम्, परवंचनेच्छा उपधा,अन्तर्निगूढेच्छाभावः। चिकीर्षाजिहेर्षेत्या- दिक्रियाभेदादिच्छाभेदाः भवन्ति। अनुकूलेष्वर्थेषु अभिलाष लक्षणो रागः, कामोमत्सरः,स्पृहातृष्णा, लोभेति पञ्चप्रकारोरागपक्षः स्त्रीसंभोगेच्छा कामः, यदन्यस्मैदीयमानमपि वस्तु धनवन्न क्षीयते। तद् परित्यागेच्छा मत्सरः अनात्मीय वस्त्वादिसा स्पृहा, पुनर्भवप्रतिसंधान हेतु भूतेच्छा तृष्णा, निषिद्धद्रव्य ग्रहणेच्छा लोभ इत्यभिलाष प्रकार भेदात् रागपक्ष एवायम्।एवं च उक्ताः सर्वे आत्मगुणा इच्छायाः एव प्रकारभेदाः वोद्धव्याः। अतः कामशास्त्रोक्तस्य रतिश्रृंगारादेरत्रैव इच्छा पदार्थेऽन्तर्भावः। तेषां रतिविशेषे रतिसाधनांगनादौ वा इच्छारूपत्वात्। एवं भक्तिशास्त्रोक्त भावभक्त्यादि पदार्थानामपि परमेश्वरेऽनुराग विशेषत्वरूपादिच्छायामेवान्तर्भावः। स्नेहप्रीत्यादिकमपि सर्वमिच्छायायाः प्रकारभेदाः एव। आत्मनस्तुकामाय सर्वप्रियं भवति। चिकीर्षाऽपि इच्छारूपा एव। कर्तुमिच्छा चिकीर्षा इति। कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणी इच्छा चिकीर्षा। भोजनादौ चिकीर्षा जायते। बलवदिष्टसाधनत्वज्ञानस्य प्रतिबंधकत्वे तदभावस्यैव तत्र सत्वात् चिकीर्षोपपत्तेः।

## ध-अतीन्द्रियमनोधर्मनिरूपणम्।

तार्किकादीनां मते केचिदतीन्द्रियाः आत्मविशेष गुणाः अन्तःकरणधर्माः सन्ति तेनैरेव मनोधर्माः प्रायशोजायन्ते। तेषां हि प्रधाना अदृष्टसंस्काराः

कुत्रचिदसाधारणकारणत्वेन अदृष्ट संस्काराः कुत्रचिद्वा साधरणकारणत्वेन ज्ञानसुख दुःखेच्छाद्वैषप्रयत्नान प्रम्यक्षगम्यानन्तःकरण धर्मान् जनयन्ति। यथा अदृष्टाख्य धर्माधर्मौ सुखदुःखोपभोगौ जनयतः संस्काराश्च समृतिप्रत्यभिज्ञानादिकं जनयति। श्रूयते च बृहदारण्यके ' तं विद्याकर्मणी समन्वारमेते पूर्वप्रज्ञा च।११२ अत्र पूर्वप्रज्ञा ज्ञानजः संस्कारः कर्म च कर्माशयरूपादृष्टमेव ते जन्मान्तरारम्भे जीवनमनुवर्तन्ते इति भावः। चित्तस्य द्वयेधर्माःपरिदृष्टाश्चापरिदृष्टाश्च तत्र प्रत्ययात्मकाः प्रमाणादयो रागादयश्च परिदृष्टाः वस्तुमात्रात्मकाः अपरिदृष्टाः। ते च सप्तैवभवन्ति।

निरोधधर्मसंस्काराः परिणामोऽथ जीवनम्।
चेष्टाशक्तिश्च चित्तस्य धर्माःदर्शनवर्जिताः।।११३

धर्माधर्मरूपकर्माशयः संस्कारोवासना ज्ञानाशयमेव। धर्माधर्माभ्यां मृतशरीरान्मनसो विभागकारणमसर्पणकर्म उत्पद्यते।तदनन्तरं तन्मनोमृतशरीराद् बहिर्निर्गतं ताभ्यामेवलब्धवृत्तिभ्यां धर्माधर्माभ्यां सकाशादुत्पन्नेनातिशरीरेण संबध्यते। तदाऽऽतिवाहिक शरीरसंक्रान्तं मनः स्वर्ग नरकं वा गच्छति। तत्र गत्वा कर्मानुरूपेण शरीरेण सम्बध्यते, स्वर्गेनरकेवा प्रत्यग्रजातेन शरीरेण मनः संयोगार्थ मनसः कर्म उपसर्पणम्।अदृष्टानिधर्माधर्मरूपाणि पुण्यपापरूपाणि वा विहित निषिद्धकर्मानुष्ठानजन्यानि प्रायशो भाविजन्मवेदनीय सुखदुःख फलानि भवन्ति। "क्लेशमूलः कर्माशयः दृष्टादृष्टजन्मवेदनीयः।११४ तस्मादिह जन्मनि फलजनकानामदृष्टानां प्रारब्धनाम धेयानां पूर्वजन्मान्तरे एवोपचय आसीदिति बोध्यम्।कदाचित्तु इह जनितानां इहैवफलभोगाः। तत्र धर्मत्वसामान्यवान सुखसाधारणं कारणं धर्मः अधर्मत्व सामान्यान दुःखासाधारणं कारणमधर्मः। जैनमते यद्यपि धर्माधर्मौ स्वीकृतौ न तेषामात्मगुणत्वं गुणत्वं वा तेषां बंधकारण जडपुद्गलद्रव्यरूपत्वात्। व्यासभाष्ये दृष्टादृष्टकर्मफलविषये इत्थं निगदितं वर्तते।'ते पुण्यापुण्यकर्माशयः कामक्रोधलोभमोहप्रसवः।स दृष्टजन्मवेदनीय- श्चादृष्टजन्मवेदनीयश्च तत्र तीव्रसंवेगेन मंत्र,तपः,समाधिभिर्निर्वर्तित ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा यः परि निष्पन्नः स सद्यः परिपच्यते। पुण्यः कर्माशय इति। तथा तीव्रक्लेशेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः पुनः पुनरपकारः स चापिपापकर्माशयः सद्य एव परिपच्यते।११५ प्रारब्धक्रियमाण सञ्चितभेदात् न्यायवैशेषिक सांख्यपातञ्जल वेदान्तादि मतेषु एतानि त्रिविधानि कर्माणिभवन्ति। पूर्व-पूर्व जन्मार्जितेषु कर्मसु यानि वर्तमान देहमारभ्य तत्र भोगार्थ फलप्रदाने नियोजितानि तान्येव प्रारब्धानि उच्यन्ते। यान्यवशिष्टानि भाविजन्मान्तरेषु फलोत्पादन योग्यानि तानि सञ्चितानि। अस्मिन् जन्मनि अनुष्ठीय मानानि क्रियमाणानि कर्माणि उच्यन्ते। तत्र प्रारब्धानि अस्मिन्नेवजन्मनि भोगेन

प्रायश्चित्तादिना वा क्षेतव्यानि। न तु ब्रह्मज्ञानेन प्रकारान्तरेण वा प्रारब्धस्य क्षयः संभवति। मुक्तेषु यथा क्षीणेवेगे पतति। तथैव भोगेन क्षये प्रारब्धस्य विनाशो भवति। योगमते तु निर्विकल्पकसमाधिनाऽपि प्रारब्धस्य द्रुतं क्षयः संभवति। सञ्चित क्रियमाणयोस्तु प्रायश्चित्तादिना अंशतः ब्रह्मज्ञानेन च सम्यक् विनाशो भवति।

# न-संस्कारनिरूपणम्।

कर्मभ्यःशुभाशुभकर्मणा मवशेषरूपमदृष्टं फलं संस्कारविशेषादुपजायते तथैव ज्ञानानामप्यवशेषरूपः संस्कारो जायते। स च संस्कारः स्मृतिरूपकार्यैरनुमेयः। अयमेवसंस्कारः भावना ज्ञानाशय-वासनेत्यादि पदैरभिधीयते। संस्कारत्वजातिमान स्वोत्पत्यवस्थापादको गुणः संस्कारः। ज्ञानजः संस्कारो भावना इति। वैशेषिकसूत्रे हि स्मृति स्वप्नादिषु संस्कारस्योल्लेखो दृश्यते।'आत्ममनसोः संयोगविशेषात्त संस्काराच्च स्मृतिः' तथा स्वप्नः।११६ इत्यत्र यथा स्मृतिः संस्कारजन्या तथा स्वप्नोऽपि संस्कारजन्यः इत्युक्तम्। भावनासंज्ञकस्त्वात्मगुणोदृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञान हेतुर्भवति। ज्ञानमददुःखादिविरोधी। यथा दाक्षिणात्यस्योष्ट्रदशनादिति।विद्याशिल्पव्यायामादिष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्व-पूर्व संस्कारमपेक्षमानादुत्तरोत्तरस्मात् प्रत्ययादात्ममनसोः संयोगात् संस्कारातिशयो जायते। प्रयत्नेन मनश्चक्षुषि स्थापयित्वाऽपूर्वमर्थं दिदृक्षमानस्य विद्युतसंपातदर्शनवदादरप्रत्ययः तमपेक्षमानादात्ममनसोः संयोगात् संस्कारातिशयोजायते। यथा देवहृदेराजत सौवर्ण पद्म दर्शनात्।११७ भावनासंज्ञकस्तु संस्कार आत्मगुणः प्रतिपक्षज्ञानेन संस्कारो विनश्यते। द्यूतादि व्यसनापन्नस्य पूर्वाधीत विस्मरणात्। मदेनापि संस्कारस्य विनाशः सुरामत्तस्य पूर्वस्मृतिलोपात् मरणादि दुःखादपि संस्कारो विनश्यति। जन्मान्तरानुभूत स्मरणाभावात्। आदिशब्देनसुखादि परिग्रहः भोगासक्तस्य कुपितस्य वा पूर्ववृत्यस्मृत्याभावात्। पटुप्रत्ययात् अभ्यासप्रत्ययात् आदरप्रत्ययाच्च संस्कारो जायते। विद्याशास्त्रागमादिका, शिल्पंपत्रभंगादिकाक्रिया व्यायाम आयुधादि श्रमः। पूर्व संस्कारेणैव कमिक स्मरणं पुनः पुनः स्मरणं भवति। समानप्रकरण्क स्मरणस्य संस्कारनाशकत्वे प्रमाणाभावात् तथा च पुनः पुनः स्मरणाद् दृढतर संस्कारोत्पत्तिर्न संस्कारस्य बाहुल्याद् भवति किन्तु विद्यमानस्यैव संस्कारस्य झटित्वोद्बोधक समधानं पुनः पुनः स्मरणेन जायते। पातञ्जलमते अनुभवो विषयस्यैव प्रत्ययस्यापि संस्कारं जनयति, तथा स्मरणमपि सुषुप्तिकाले यद्यपि चित्ते संस्कारास्तिष्ठन्ति तथापि न ते विषयस्मारका भवन्ति निद्रा दोषाभिर्भवादेव जीवन्मुक्तस्य प्रारब्धसंस्कारवशाद् यच्चकभ्रमिवत् शरीरावस्थानं भवति। तत्र स एव एकः संस्कारः प्रारब्धभोगसंपादकः। अद्वैतवेदान्तमते वृत्तिध्वंस एव संस्कारजनकः। वृहदारण्यकभाष्ये हि शंकरेणोक्तं संस्कारविषये 'नहि वासनयाविना कर्मकर्तुं फलञ्चोपभोक्तुं शक्यते

नहि अनभ्यस्त विषये कौशलमिन्द्रियाणां भवति। पूर्वानुभववासना प्रवृत्तानाममिन्द्रियाणामिहाभ्यासमन्तरेण कौशलमुपपद्यते। दृश्यते च केषाञ्चित् कासुचित क्रियासु चित्रकर्मासु विनैवेहाभ्यासेन जन्मत एव कौशलम् कासुचिदत्यन्त सौकर्य युक्तास्वप्य कौशलं केषाञ्चित् यथा विषयोपभोगेषु स्वभावतः एव केषाञ्चित् कौशलाकौशले दृश्येते।११८ मधुसूदनोक्तं भक्तिरसायने संस्कारोत्पत्तौ कामक्रोधस्नेहादि तापकैः द्रवीभूत चित्तस्य हेतुत्वम्—

द्रुतेचित्तेविनिक्षिप्तः स्वाकारोयस्तुवस्तुनः।

संस्कारवासनाभाव भावनाशब्दभागसौ।।

शिथिलीभावमात्रन्तु मनोगच्छत्यतापकैः।

न तत्रवस्तुविशति वासनात्वेन किञ्चन।।११९

अथ अद्वैतमते अन्तःकरणमेव संस्काराश्रयो न त्वात्मा।ननु तथापि अद्वैतमते मिथ्या रजतानुभवजन्याः संस्काराः कुत्रोत्पद्यते? तथा च कथमनुभूतानां मिथ्या रजतादीनां स्मृतिः? उच्यते।अविद्यावृत्तिजन्याः संस्काराः अविद्यायामुत्पन्नापि अन्तःकरणे पर्यवस्यन्ति। रामानुजमते भावनाख्य संस्कारस्य ज्ञानविशेषरूपत्वात्।तन्मते संस्कारो हि धर्मभूत ज्ञानस्यावस्था विशेषः स्मृत्यादिवत् ज्ञानस्य द्रव्यत्वेन तस्यावस्थावत्वमुपपद्यते।

## ५-निर्विकल्पक प्रत्यक्षनिरूपणम्।

किञ्चित् प्रत्यक्षमस्ति न वा? तन्नाम निर्विकल्पकम्? यदिप्रत्यक्षमस्ति चेद् किं तस्य स्वरूपम्? स्वरूपालोचनमात्रम् ग्रहणमात्रं विकल्परहितं प्रत्यक्षमात्रमिति यावत्। यदिवस्तु रूपस्य निर्विकल्पकत्वेन ग्रहणं नेष्यते तदा तद्वा चक्रशब्दस्य स्मृत्याभावात् सविकल्पकमपि न स्यात्। अतः सविकल्पकमिच्छता निर्विकल्पकम्प्येषितव्यम् तच्च न सामान्यमात्रम् गृह्णाति भेदस्यापि प्रतिभासनात्। एवं प्रशस्तपादवैशेषिकाचार्य मते अनुभव बलात् सविकल्पकान्यथानुपपत्या चाविविक्त सामान्यविशेषग्राहि निर्विकल्पक प्रत्यक्षमवश्यमेव स्वीकार्यमिति प्रत्यक्षनिर्णये उक्तमेव।गौतमीयन्यायसूत्रेऽपि प्रत्यक्षलक्षणे अव्यपदेश्यमित्यनेन निर्विकल्पक प्रत्यक्षमेवोक्तमिति प्रतिपादितं प्रत्यक्षनिरूपणे।व्यपदेशरहितमपि शब्दानुवेधरहितं ज्ञानं संभवतीति शाब्दिकमतनिराकरणमेव तत्रोक्तमितिबोध्यम्। नव्य नैयायिकानांमते विशिष्ट ज्ञानस्य विशेषणज्ञानजन्यत्वात् घट इति सविकल्पक प्रत्यक्षस्य घटत्वविशिष्ट घटज्ञानरूपस्य घटत्वरूपविशेषण ज्ञानजन्यत्वात् घटसविकल्पक प्रत्यक्षात् पूर्व घट-घटत्वयोः संसर्गानवगाहि निष्प्रकारकं ज्ञानं जायते निर्विकल्पकाख्यम्। तच्च ज्ञानं निष्प्रकारकत्वादिन्द्रियम् मानसप्रत्यक्ष विषयमितिभावः। तच्चोक्तविश्वनाथेन चक्षुःसंयोगानन्तरं घट इत्याकारकं घटत्वादिविशिष्टंज्ञानं न संभवतीति। पूर्व विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषण ज्ञानस्यकारणत्वात्।तथा च प्रथमतः घट-घटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते। तदेव निर्विकल्पं तद् न

University of Baroda

प्रत्यक्षम्।१२० तच्च निर्विकल्पकप्रत्यक्षं नव्यन्यायमते प्रकारतादि शून्यत्वात् भ्रमप्रमालक्षणयोगाद् न भ्रमो नापि प्रमा तथा चोक्तं तेनैव—

न प्रमा नापिभ्रमः स्यान्निर्विकल्पकम्।
प्रकारतादिशून्यंहि सम्बन्धानवगाहितत्।।१२१

अतीन्द्रियत्वाच्चानुमानगम्यमेव निर्विकल्पकं न स्व प्रत्यक्षसिद्धम्। निर्विकल्पकप्रत्यक्षस्य प्रमात्वमेव स्वीकृतं तस्याबाधात्। तदुक्तं मितभाषिण्याम् निर्विकल्पं तु प्रमायामेवान्तर्भवति तस्य प्रथमाक्ष सन्निपातजस्य वस्तुस्वरूपमात्र विषयकस्य क्वाप्यबाधात्।१२२ कुमारिलभट्टपादैरपि शाब्दिकमतखण्डनपूर्वकं स्वमतानुसारेण निर्विकल्पक प्रत्यक्ष प्रतिष्ठापितम्——

अस्तिह्यालोचनज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादि विज्ञान सदृशं शुद्धवस्तुजम्।।
न विशेषो न सामान्यं तदानीमनुभूयते।
तयोराधारभूता तु व्यक्तिरेवावसीयते।।
निर्विकल्पकबोधेऽपिद्वयात्मकस्यापि वस्तुनः।
ग्रहणंलक्षणाख्येयं ज्ञात्वाशुद्धं तु गृह्यते।।
यथारूपादयोभिन्नाःप्राक्शब्दात् स्वात्मनैवतु।
गम्यन्ते तद्वदेवैतत् संज्ञित्वं केवलं परम्।।
नचाविकल्पितःशब्दादितिवाच्योन गृह्यते।१२३
तेनागृहीतशब्दोऽपि गोत्वादीनप्रतिपद्यते।।

केचिद् व्यवहारा ये निर्विकल्पकमात्रादेव भवन्ति, यथाऽग्निना दह्यमानस्य सहसाऽपसरणम्।तिर्यग् बालानां चाविकल्पकेनैव सर्वोव्यवहारः। न च तेषां सूक्ष्मसद्भावे प्रमाणमस्ति।१२४

पुनश्चोक्तं तेनैव लक्षणाख्येयमिदं निर्विकल्पकस्य रूपं सामान्य विशेषात्मकं वस्तु निर्विकल्पकेन विषयीक्रियते इति। तच्चनिर्विकल्पकलक्षणकारेणैव परीक्षकैर्व्याख्यायते। प्रमाता तु सामान्यमिदं विशेषोऽयमिति च विवेक विधुरमिदमिति सम्मुग्धरूपमेव वस्तूपलभते। अद्वैतवेदान्तिनस्तु तार्किकयुक्तिमसहमाना वदन्ति। नायं नियमः सविकल्पक प्रत्यक्षेप्रथमतः निर्विल्पिकमेव जायते। तादृशनिर्विकल्पेप्रमाणाभावात् प्रकारान्तरेण निर्विकल्पक प्रत्यक्षमद्वैतिनामपि सम्मतम्। तच्च तन्मतेऽहं ब्रह्मास्मि तत्वमसीत्यादि वाक्यजन्यं संसर्गानवगाहि अखण्डचैतन्यरूपार्थापरोक्षम्। निर्विकल्पं तु संसर्गानवगाहि ज्ञानम्। यथा सोऽयं देवदत्तः तत्वमसीत्यादि वाक्यजन्यज्ञानम् ननुशाब्दमिदं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वादिति चेत् न।न हीन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रंदूषितत्वाद्।अपि च केचित् सुषुप्तौ अविद्यावृत्या निर्विकल्पक

साक्षिचैतन्यानुभवमपि स्वीकुर्वन्ति। उक्तं च सिद्धान्तबिन्दौ मधुसूदनस्वामिना 'सुषुप्तौ निर्विकल्पक साक्षिचैतन्यानुभवांगीकाराच्च।१२५
बौद्धानांमते तु स्वलक्षणविषयं निर्विकल्पमेव प्रत्यक्षप्रमाणम् न सविकल्पम्। तस्य च सामान्यं विषयः सामान्यस्य कल्पना रूपत्वात् किन्तु वस्तुनो यदसाधारणं स्वलक्षणं तत्वं तदेव निर्विकल्पक प्रत्यक्षस्य विषयोभवति। यथा वैयाकरणानां न निर्विकल्पकं प्रत्यक्षस्यविषयो भवति। यथा वैयाकरणानां निर्विकल्पकं नाम प्रत्यक्षमस्ति। विकल्पकज्ञानस्यबद्धिनिर्माणस्य भ्रान्तत्वात्।

# फ-अलौकिक प्रत्यक्षनिरूपणम्।

लौकिकप्रत्यक्षं इन्द्रियार्थयोः संयोगादि सन्निकर्षजन्यं निरूपितम्। अलौकिकप्रत्यक्षं न्यायवैशेषिकबौद्धजैन सांख्यपातञ्जल शंकर रामानुजादीनां सर्वेषामेव सम्मतम्। मीमांसकानां मते तु अविद्यमाने अलौकिके वा अर्थे योगिनामपि प्रत्यक्षं न संभवति, तत्रेन्द्रिय सन्निकर्षासम्भवात्। कथंचित् योगज धर्म बलेन लौकिकेऽर्थे दूरस्थे व्यवहिते वा संभेतापि अलौकिकं ज्ञानम् तदपि अस्मदादीनां प्रतिभा प्रत्ययवत् न प्रत्यक्षम्, न वा प्रमाणम्, भूयसो विसंवादात्। तदुक्तं श्लोकवार्तिकके——
अतीतानागतेऽप्यर्थे सूक्ष्मे व्यवहितेऽपि वा।
प्रत्यक्षंयोगिनामिष्टं कैश्चित् मुक्तात्मनामपि।।
न लोके व्यतिरिक्तं हि प्रत्यक्षंयोगिनामपि।।१२६
वैशेषिकसूत्रे तु विद्यारूपेण प्रमाणत्वेनैवार्ष ज्ञानमलौकिकमुक्तम्———
'आर्षसिद्धदर्शनं च धर्मेभ्यः।'१२७
ऋषीणां योगजधर्मेणजनितं यच्चसिद्धानांसतां वस्तूनां दर्शनं प्रत्यक्षात्मकं तत् धर्मेभ्यः एव जायते इति प्रमाणमेव न भ्रमरूपमिति भावः। यद्यपिन्यायसूत्रेन्यायभाष्येच नालौकिकप्रत्यक्षं योगजप्रत्यक्षं वा कथितं दृश्यते। न च आर्षज्ञानस्य वैशेषिकैरिव पृथकप्रामाण्यं नैयायिकैः स्वीक्रियते, तथापि समानतंत्रन्यायेन योगजधर्मजन्यमलौकिकप्रत्यक्षम् नैयायिकानां सम्मतमेवबोध्यम्। अतएव जयन्तभट्टेन न्यायमञ्जर्या भट्टमतखण्डनपूर्वकं योगजसन्निकर्ष बलेनालौकिकमिन्द्रियप्रत्यक्षं योगजमानसप्रत्यक्षंवा महताऽऽसेन प्रतिष्ठापितम्। जैनमतेअलौकिकप्रत्य- क्षमिन्द्रियाय जन्य मतिप्रसिद्धमेव। तन्मते हि इन्द्रियजन्यानां प्रत्यक्षाणां विशिष्टवैशद्याभावात् प्रत्यक्षत्वमभिप्रेतम्। प्रत्यक्षमन्यदिति तत्वार्थसूत्रस्य वृतौभास्करनन्दिनोक्तं 'अक्ष्णोतिव्याप्नोतिजानातीत्यक्ष आत्मा। तमेवात्मानं प्रत्याश्रितं सम्यग्ज्ञानमिन्द्रियानिन्द्रियाद्यनपेक्षं प्रत्यक्षमिति व्यपदिष्यते। अत्र तु अनिन्द्रियस्य मनसोऽप्येक्षा निराकृता जैनैरलौकिक प्रत्यक्षे आत्माश्रिते। येषां योगिप्रत्यक्षानां दूरदर्शनादिरूपाणां परमनोगतविज्ञानरूपाणां प्रकृष्टतत्वज्ञानरूपाणां चावधिमनः पर्यय

केवल ज्ञानानामेव मुख्यंप्रत्यक्षत्वं प्रकृष्टवैशद्यादिति। तेष्वपिमनः पर्यय केवल ज्ञानानामेव मुख्यं प्रत्यक्षत्वं प्रकृष्टवैशद्यादिति। तेष्वपिमनःकेवल ज्ञानानां न कदापि मिथ्यात्वं भवति। बौद्धानां मते इन्द्रियज्ञान मनोविज्ञान स्वसंवेदन योगिज्ञान रूप भेदचतुष्टय विशिष्टेषु प्रत्यक्षेषु योगिप्रत्यक्षं प्रसिद्धमेव। उक्तं हि धर्मकीर्तिना न्यायबिन्दौ 'भूतार्थभावनाप्रकर्ष पर्यन्तजं चेति।१२८ तदिह स्फुटारम्भावस्था भावनाप्रक र्षः। अभ्रकव्यवहितमिव यदाभाव्यमानं वस्तु पश्यति सा प्रकर्ष पर्यन्तावस्था। करतलामलकवद् भाव्यमानस्यार्थस्य यद् दर्शनं तद्योगिनः प्रत्यक्षम्।तद्धि स्फुटाभम्।स्फुटाभत्वादेव च निर्विकल्पम्। विकल्पविज्ञानं हि संकेतकाल दृष्टत्वेन वस्तुगृहणछब्दसंसर्ग योग्यं गृह्णीयात्। तद् सद्रूपं वस्तुनो गृह्णाद्सन्निहतार्थ ग्राहित्वादस्फुटाभम्।अस्फुटाभत्वादेव च सविकल्पकम्। ततः स्फुटाभत्वान्निर्विकल्पकम्।१२६ योगाभ्यासाहित संस्कार पाटवनिमित्ता हि स्मृतिरेव भावनेत्यभिधीयते। सा च न प्रमाणमिति स्थितमेव। न चोत्तरकालं साक्षात्कारि ज्ञानमुदेतीति प्रमाणमस्ति। अथ च कर्मकाण्डिनां मीमांसकादीनां च मते योगाभ्यासबलेनापि नालौकिकप्रत्यक्षं किञ्चिदपि संभवति। यदपि भवति योगिनांज्ञानं तदिन्द्रिय सन्निकर्षाभावान्न प्रत्यक्षमगृहीत ग्राहित्वाद्वा निश्चयाभावाद्वा नापि प्रमाणम्। उपनिषद् ब्रह्मसूत्रादि पराणां शंकरादीनामलौकिकं प्रत्यक्षं योगाभ्यासजन्यं कारणान्तरजन्यं वाऽङ्गीकृतमेव।रामानुजीयानां मते अर्वाचीनस्यजीवप्रत्यक्षस्य द्वैविध्यमुक्तमिन्द्रिय सापेक्षत्व तदनपेक्षत्व कृतम्।इन्द्रियानपेक्षमलौकिकप्रत्यक्षमपि द्विविधम्। स्वयं सिद्धं दिव्यं चेति। तत्र स्वयं सिद्धमिन्द्रियनपेक्षं योगजन्यम्।दिव्यभगवत्प्रसादजन्यं च साक्षत्कारि प्रमारूपमलौकिक प्रत्यक्षं जायते एव।नव्यास्तु नैयायिकाः योगजसन्निकर्ष बलेनैव अतीतानागत सूक्ष्मव्यवहित विप्रकृष्टार्थानां चाक्षुषादि मानसं वा प्रत्यक्षमलौकिकं स्वीकुर्वन्ति।तत्र सामान्यलक्षणसन्निकर्ष जन्यमलौकिक प्रत्यक्षं तत्रैव भवति यत्र धूमव्यक्तेश्चा- क्षुषानन्तरं धूमत्वाश्रय सकलधूमानां तादृशालौकिक प्रत्यक्षानभ्युपगमे तादृशः सकलधूमधार्मिकः संशय एव नोपपद्यते। अपि च यत्र चन्दनस्य चक्षुः सन्निकर्षानन्तरमेव सुरभिचन्दनम् इत्याद्याकारं ज्ञानं जायते। तत्र सौरभेन घ्राणेन्द्रिय सन्निकर्षाभावात् चक्षुषा च सौरभस्य लौकिक सन्निकर्षायोगात् चन्दने सौरभस्मरणात्मक ज्ञानस्य पूर्वप्रत्यक्षजन्यस्य तत्र सन्निकर्षरूपत्वात् सौरभस्यचाक्षुषमेवालौकिकम् तत्र जायते। इदमेव ज्ञानलक्षणसन्निकर्षजन्यमलौकिम् प्रत्यक्षमुपनीतमानं वाचक्षते। किञ्च चक्षुषा 'घटोनास्ति' इत्यादि प्रत्यक्षे प्रतियोगिनो घटस्योपास्थितिरपि ज्ञानलक्षणसन्निकर्षजन्यं बोध्यम्। किञ्चप्रत्यभिज्ञायां तत्तांशोपस्थितिः भ्रमस्थले रजत्वादेरुपस्थितिरपि उपनीतमानमेव प्राचीनन्यायमते तु सुरभिचन्दनमित्यादि स्थलेषु मानसप्रत्यक्षमेव। शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति।सुरभि केतक कुसुमं मधुराशर्करेति ज्ञानवदित्यप्युक्तम्।

## ब-साक्षिप्रत्यक्षनिरूपणम्।

वैष्णववेदान्तिनां तथा सांख्यपातंजलादीनां मते इदं तु साक्षि प्रत्यक्षम् विशेषतः सम्मतम्। 'तयोरन्यः पिप्पलंस्वाद्वत्यन- श्नन्योऽभिचाकशीति'१३०
इत्यादिश्रुतेरेव भोक्त्रतिरिक्त साक्षिसद्भावे प्रमाणम्। पंचदश्याम यथा———

अन्तःकरुण ततवृत्तिसाक्षीत्यादावनेकधा।
कूटस्थ एव सर्बत्र पूर्वाचार्यैर्विनिश्चितः।।
वृत्तेस्साक्षितयावृत्ति प्राग्भावस्यचस्थितः।
बुभुत्सायास्तथाऽसौऽस्मीत्याभाज्ञानबस्तुनः।।१३१
पञ्चदश्यामुद्धृतु शैवपुराणवचनं यथा——
देहेन्द्रियादि युक्तस्य जीवाभासभ्रमस्य च।
अधिष्ठानचितिः सैषा कूटस्थोऽत्रविवक्षितः।।१३२
अथेत्यत्रापि कूटस्थपदेन साक्षी अभिहितः। तथा च साक्षिस्वरूपमुक्तं गंगाधरेन्द्रेण वेदान्तसूक्तिमञ्जर्याम्————
स्वाध्यस्तदेहयुग्मादेः साक्षीतिप्रतिपादितः।
नेशोजीवोऽप्यसौ तत्वदीपेब्रह्मेतिवर्णनात्।।१३३
अद्वैतवेदान्तमते घटादीनां बाह्यबस्तूनां प्रमातृजीवप्रत्यक्ष विषयत्वेऽपि स्वान्तःकरणतद्धर्यज्ञान सुखादीनां साक्षात् साक्षिचैतन्य विषयत्वमेव न तु प्रमातृप्रत्यक्ष विषयत्वम्। अपितु तादृशसाक्षिज्ञानस्यापरोक्षत्वात् साक्षिप्रत्यक्षमित्यपिव्यपदेशोभवति। तथा स्वाज्ञानतत्कार्य शूक्तिरजतादीनामपि साक्षिप्रत्यक्षविषयत्वमेव। तदुक्तं च गंगाधरेन्द्रेण वेदान्त सिद्धान्त सूक्तिमञ्जर्याम्——
अविद्याबुद्धितद्धर्मभासकांशेतरावृतिः।
कल्प्यतेवस्तुतस्तेषु संशयादेरदर्शनात्।।१३४
यद्यपि संसारविषयस्पृहाद्युपपत्तये साक्षिण्यपि अविद्या वृत्तिः कल्प्यते। तथापि अज्ञान -ज्ञान सुखादि सत्वे तेषु संशय विपर्ययादर्शनात् तत् भासकांशेतरांशे एव साक्षिणि आवृत्तिः कल्प्यते। सांख्यदर्शनेऽपि साक्षात् सम्बन्धात् साक्षित्वमिति सूत्रे पुयषस्य यत् साक्षित्वं तत् साक्षात् सम्बन्धादेव न तु परिणामादित्युक्तम्। उक्तं च विज्ञान भिक्षुणा——'पुरुषे च साक्षत् सम्बन्धः स्वबुद्धिकृतेरेवभवति, अतो बुद्धिरेव साक्षी पुरूषोऽन्येषाम्। एव सांख्यपातञ्जलयोरपि साक्षिणः पुरूषस्यापरिणामित्वेऽपि साक्षात् ज्ञानं परोक्षरूपं स्वीकृतम्।

## भ-अभावप्रत्यक्षनिरूपणम्।

यस्य येनेन्द्रियेण प्रत्यक्षं भवति तद् भावस्यापि प्रत्यक्षं तेनैवेन्द्रियेणभवति इति तार्किकादीनां मतम्। यद्यपि प्रभाकरादीनां मते अभावो नातिरिक्तः किन्त्वधिकरण स्वरूप एव तथापि अभावानां प्रतियोगिग्रहकेन्द्रियेणैव वक्तव्यमन्यथा कुसुमविशेषेगंधविशेषाभावो जले वा गंधाभावश्चक्षुषैव गृहीतःस्यात् न तु तथा गृह्यते। तार्किकमते हि अभावानां प्रत्यक्षविषयत्वं वैशेषिकसूत्रेष्वेव दृश्यते। अभावानां प्रत्यक्षे प्रतियोगिस्मरणं तथा प्रतियोगिनो घटादेः योगयानुपलब्धिरपि सहकारिकारणं वेदितव्यम्। तदुक्तं प्रथमोक्तवैशेषिकसूत्रटीकायां जयनारायणेन——'असन् घटः, नष्टोघटः, ध्वस्तोघटः इत्यादि प्रत्यक्षं विरोधिप्रत्यक्षवत् प्रतियोगिघटप्रत्यक्ष तदनुभवसिद्धं लौकिक संघर्षजन्यञ्चेत्यर्थः। तत्र च प्रतियोगिप्रत्यक्षं चक्षुरादिसंयोगजन्यं ध्वंस प्रत्यक्षन्तु चक्षुरादि संयुक्त विशेषणता जन्यमिति विशेषः। अपरमपि विशेषमाह भूतप्रत्यक्षाभावादिति भूतस्यातीतस्य प्रतियोगिनो घटादेः प्रत्यक्षस्याभावात् योग्यानुपलम्भरूपात् कारणात् भूतस्यातीत घटादेः स्मृतेः स्मरणात्मकात् प्रतियोगि ज्ञानाच्च जायमानमिति पूरणीयम्। पुनश्चोक्तं तेनैव सूत्रान्तर टीकायाम्'यथा ध्वंसे इन्द्रियसन्निकर्ष योग्यानुपलब्धिः प्रतियोगि ज्ञानैः प्रत्यक्षं जायते। तथा प्रागभावेऽपीत्यर्थः।१३५ अन्योन्यभाव प्रत्यक्ष प्रतिपादक सूत्रस्य टीकायामाह—'अघटोपटः,अगौरश्वः अधर्मः सुखमित्याद्याकारकोऽन्योन्याभाव प्रत्ययोऽपि एतेन व्याख्यात इति समुचितार्थः। तथाऽन्योन्याभाव प्रत्यक्षेऽपि इन्द्रिय सम्बद्ध विशेषणता प्रतियोग्यनुपलम्भः प्रतियोगिज्ञानञ्चैतानि कारणानि। प्रमेयाभावप्रतीतौ भावग्राहक प्रत्यक्षादि पञ्चप्रमाणानुत्पत्तिरभावाख्यं प्रमाणान्तरं कैश्चिदिष्टम्। एवम सति अभावो लिंगमेव स्याद्विनाग्रहण भावसापेक्षत्वात् तदनपेक्षत्वे च विशेषेण तस्याभावस्याभावबोधकत्वमिति दुर्निवारणप्रसंगः।१३६ श्रीधरेणपुनः वैशेषिकसूत्राभिप्रायेण इन्द्रिय गम्यत्वमेवाभास्योक्तम्। यथाऽपिचेन्द्रिय सन्निकर्षाद्युपलभ्यमाने भूतलेऽभावज्ञानमपि भवति—अघटं भूतलमिति तत्र भूतलस्येवाभवस्यापि प्रत्यक्षता किं नेष्यते। यथेन्द्रियान्वय व्यतिरेकानुविधायिकार्य भावे दृश्यते तद्वद्भावेऽपीति भाववदभावोऽपीन्द्रिय ग्रहणयोग्येव। नव्याः नैयायिकाः योग्यप्रतियोग्यनुपलब्धि सहकारेण प्रत्यक्ष गम्यत्वमेवाभावानां कथयन्ति। भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते। अत्राभावपक्षे योग्यानुपलब्धिः कारणम्। तथा हि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते। तेनाभावोपलम्भे प्रतियोग्युपालम्भाभावः कारणम्। तथाहि यत्रालोकसंयोगादिकं वर्तते। तत्र यद्यत्र घटः स्यात् तर्हि उपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादेः प्रत्यक्षं भवति। अंधकारे तु नापादयितुं शक्यते तेन घटाभावदेरन्धकारे न चाक्षुष प्रत्यक्षम्। स्पर्शनप्रत्यक्षं तु भवत्येव आलोकसंयोगं विनाऽपि स्पार्शनप्रत्यक्षस्यापादयितुं

शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनोयोग्यता अन्योन्याभाव प्रत्यक्षेऽधिकरण योग्यताऽपेक्षिता अतः स्तम्भादौ पिशाचभेदोऽपि चक्षुषा गृह्यते।१३७ एवं तार्किकादि मते योग्यप्रतियोग्यनुपलब्धि सह कृतमिन्द्रियमेवाभाव प्रत्यक्षे करणं प्रमाणं वा। अभावानुमित्यादौ तु यथायोग्यं व्याप्तिज्ञानादिकं प्रमाणं वेदितव्यम्। भाट्टमीमांसकाः वेदान्तिनश्च नैवं मन्यन्ते। तेषां मते अभावाधिकरण ग्रहार्थमिन्द्रियपेक्षायामपि अभावग्रहो नेन्द्रियप्रमाणजन्यः अपितु प्रतियोग्यनुपलब्धिरूपाभावाख्य प्रमाणजन्य एव। उक्तं च भट्टनारायणेनमानमेयोदये———

अथोपलम्भयोग्यत्वेसत्यप्यनुलम्भनम्।
अभावाख्यंप्रमाणंस्यादभावस्यावबोधकम्।।१३८

ततश्च विषयभूतंघटं तदधीनांश्चेन्द्रियसन्निकर्षादीन् विना यच्चक्षुरुन्मीलनालोक सम्पातमनः प्रणिधानादिकं घटोपलम्भकारणं तत्सर्वमिदानीमेव संजातमित्यवगमे सति तत्सहकृतःसन् घटानुपलम्भो घटाभावं बोधयतीत्येवं सर्वत्र द्रष्टव्यम्।१३९ बौद्धानांमते भावातिरिक्ताभाववस्त्वाभावात् अभावानां भावरूपत्वात् प्रत्यक्ष प्रमाणगम्यत्वमेव। अतो नास्ति अभावाख्यं प्रमाणान्तरमभावानां ग्राहकम्। तदुक्तं शान्तिरक्षितेन तत्वसंग्रहे———

प्रमाणपञ्चकं यत्र वस्तुरूपेनजायते।
वस्तुसत्तावबोधार्थतत्राभावप्रमाणता।।
प्रमाभावाच्च वस्तूनामभावःसंप्रतीयते।
चतुर्धाचविभिन्नोऽसौप्राग्भावादिभेदतः।।
मानंकथमभावश्चेतुप्रमेयंचात्रकीदृशम्।
मेयोयद्वद्भावोहिमानमप्येवमिष्यताम्।।१४०

तदनन्तरम् स्वमतमेव तैः निरुपितम्———

कार्यादीनामभावोहिभावो यः कारणदिना।
स चापरविविक्तात्मा प्रत्यक्षेणैवगम्यते।।१४१

अथ घटादीनां कार्याणां यः प्रागभाव स कारण मृत्तिकादिरूपः भाव एव। अतः स भावरूपोऽभावः प्रत्यक्षेणैवगृह्यते इत्यर्थः।

## म-जातिप्रत्यक्षनिरूपणम्।

नैयायिकानां मते स एवपदार्थो द्रव्यगुणाद्यतिरिक्तो जातिरित्युच्यते। द्रव्यगुणकर्मसु विद्यमाना सत्तापरा जातिः।द्रवत्वादिजातिस्तु अपरा जातिरपरं वा सामान्यमुच्यते। जैनमाध्वैरस्तु सामान्य स्वीकारेऽपि न तेषां नित्यत्वमनेकसमवेतत्वं वा स्वीक्रियते। सर्वथापि तेषां योग्यवृत्तीनां सामान्यानां प्रत्यक्षग्राह्यत्वं तार्किक मीमांसक वेदान्तिभिः सर्वैरेवस्वीकृतम्। तथा च यद्यपिप्रत्यक्षयोग्यवृत्तीनां परमाणुत्वधर्मत्वा-

द्विजातीनां न प्रत्यक्षग्राह्यत्वं तथापिगोत्वाश्वत्वमनुष्यत्वादिजातीनां हि इन्द्रियव्यापारेणैव ग्रहणात् प्रत्यक्षग्राह्यत्वमेव।वैशेषिकमतानुसारेण——

तत्रेयं द्विविधाजातिः परैरभ्युपगम्यते।
सामान्यमेवसत्ताख्यं समस्तेष्वनुवृत्तितः।।
द्रव्यत्वादितुसामान्यंसद्विशेषोऽभिधीयते।
स्वाश्रयेष्वनुवृत्तस्य चेतसो हेतुभावतः।।
प्रत्यक्षतः प्रसिद्धास्तुसत्वगोत्वादिजातयः।
अक्षव्यापारसद्भावेसदादिप्रत्ययोदयात्।।
अनुमानबलेनापिसत्वमासां प्रतीयते।
विशेषप्रत्ययोयेन निमित्तान्तर भाविकः।।१४२

अत्रानुमानप्रमाणेनापि सत्तादिजातिसिद्धिरुक्त्वाबौद्धैरस्तु सामान्यातिरिक्त पदार्थस्वीकारेण सामान्यस्य प्रत्यक्षगम्यत्वमपि नांगीक्रियते। इतरव्यावृत्तिरूपापोहेनैवानुवृत्त प्रत्यय संभवात् सामान्यस्वीकारस्तर्कासह इति बौद्धमतमप्युक्तम् संक्षेपेण——

जातिःप्रत्यक्षगम्येतिभ्रान्तानांखलुभाषणम्।
यानाजात्युपहितागोरश्वोऽयमितीहधीः।।
न सा चक्षुःसम्प्रयोगसमनन्तरभाविनी।
किन्तु संकेतसंञ्जातसंस्काराहित संस्मृतेः।
साहिव्यवहितास्मार्तीतस्मात्साकल्पनैवहि।।
प्रत्यक्षंकल्पनापोढंविकल्पाः कल्पनात्मकाः।
चक्षुषास्पृष्टमात्रं तु निर्विकल्पं हि गृह्यते।
न चागृहीतसंकेतःपिण्डमेकं विलोकयन्।
नाम्नाजात्यापि तं वेत्ति तत्सामान्यं न चाक्षुषम्।।
धियोऽप्यनुगतत्वं यन्नजातिं समपेक्षते।
धीःपाचकोऽयमिति यानसा जात्यानुगामिनी।।१४३

अक्षव्यापारान्तरमेव सदादिप्रत्ययस्यासिद्धत्वात् न सत्ताजातिप्रत्यक्षेपेण गृह्यते सदृशव्यापारत्वेनापि अनुगतप्रत्ययसम्भवादित्यर्थः।गौरयं घटोऽयमित्यादि प्रत्ययागृहीतसंकेतस्यैव संभवात् संकेत संस्कारजन्या इति वेदितव्यम्।
गौर्गौरिति प्रत्ययो यत्र जायते।तत्र वस्तुभूतगोजातेरभावेऽपि प्रतिविम्बात्मा अगोऽपोहः प्रवर्तते। स्वलक्षणात्मा अपोहइन्द्रियैरेव गृह्यते, प्रतिविम्बात्मा इतरव्यावृत्तिबुद्धिरूपापोहः बुद्धिस्वभावत्वात् बौद्धमते प्रसिद्धस्वसंवेदन प्रत्यक्षेण गृह्यते इत्यर्थः।

## य-प्रतिभा निरूपणम्।

योगजधर्मजन्योऽलौकिकोज्ञानविशेष एव प्रतिभाज्ञानमुच्यते। वैशेषिकदर्शने तदेवयोगजज्ञानमार्षज्ञानं वा प्रतिभा। आत्ममनसोः संयोगात् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याक्षते। तत् तु प्रस्तारेण दवर्षीणाम्, कदाचिदेवलौकिकानाम् यथा कन्यकाब्रबीति श्वोमे भ्राताऽऽगन्तेति हृदयं मे कथयति।

अपिचानागतंज्ञानमस्मादादेरपिक्वचित्।
प्रमाणंप्रातिभंश्वोमे भ्राताऽगन्तेतिदृश्यते।।
नानार्थजं च संदिग्धं नबाधविधुरीकृतम्।
नदुष्टंकारणञ्चेति प्रमाणमिदमिष्यताम्।।
क्वचिद्बाधकयोगश्चेदस्तु तस्याप्रमाणता।
यात्रापरेद्युरभ्येति भ्रातातत्र विमुच्यताम्।।
काकतालीयमितिचेन्नप्रमाणप्रदर्शितम।
वस्तुतत्काकतालीयमिति् भवितुमर्हति।।१४३

एवं जयन्तादिप्राचीनतार्किकैरलौकिकप्रतिभाज्ञानस्यापि बाधकाभावे प्रामाण्यं प्रत्यक्षत्वं च स्वीकृतम्। भविष्यदर्थस्य ज्ञानकालेऽविद्यमानत्वात् बहिरिन्द्रिय सन्निकर्षाभावेऽपि मानसप्रत्यक्षत्वमव्याहतम्। तद्देशसम्बन्धस्य तत्र प्राग्भावो न तु धर्मिणः सह विद्यतेएव प्राग्भावतः, स च कुतश्चिद् भोजनोत्कण्ठादेः कारणात् स्मरणपदवीमुपारूढः श्वस्तनगमन विशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति। तस्मादनर्थजत्वाभावात् प्रमाणं प्रातिभम्, प्रमाणं च सत् प्रत्यक्षमेव न प्रमाणान्तरं शब्दलिंग-सारूप्य-निमित्तानपेक्षितत्वात्। ननुप्रत्यक्षमपि माभूदिन्द्रियानपेक्षितत्वात् मैवम्, मनस एव तत्रेन्द्रियत्वात् पूर्वोत्पन्न चाक्षुषविज्ञानविशेषणस्य बाह्यस्य वस्तुनोमनोग्राहकमिति नान्धाद्यभाव इत्युक्तम्। शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यंज्ञानं मानसं प्रत्यक्षं भवति।न च सिद्धदर्शनंप्रतिभा अस्मादादेरपि भावात् तस्मान्नप्रमाणान्तरं प्रातिभम् अपि तु प्रत्यक्षमेव।१४४

वाक्यपदीयेवाक्यार्थरूपाप्रतिभा इति भतृहरिणानिरूपिता। तन्मते बाह्यार्थभावेऽपि शब्दादेवार्थ प्रतिभा उत्पन्नासति अर्थस्फुरणात्मकेन तेनैव सर्वं व्यवहारोपपद्यते। अतः प्रतिभामात्रं जगत् शब्दविवर्त एव———

शब्देष्वेवाश्रिताशक्तिर्विश्वस्यास्यनिबंधिनी।
यन्नेत्रः प्रतिभात्मायं भेदरूपःप्रतीयते।।१४५

अस्यविश्वस्य व्यवहारकारणभता शान्तिः वाच्यवाचकभावरूपा शब्देषु एव आश्रिता इति।शब्दरूपज्ञापकविशिष्टः सर्वोऽपिमेदव्यवहारः प्रतिभात्मक एव इति भावः। यथाऽवस्थिते वनितात्मनि बाह्येऽर्थे वासनानुसारेण कुणपइति कामिनीति भक्ष्यामिति प्रतिभा भवन्ति, तथा असत्यपि व्याघ्रगमने व्याघ्रागतेति इत्युक्ते शूराणामुत्साह,

कातराणां भयम् भवतीति, शब्दार्थप्रतिमा भवतीति। प्रतिमामात्रं जगत। अथएवासत्यपि बाह्येऽर्थे एष बंध्यासुतो याति, राहोः शिरः इत्यादिवाक्यतोऽर्थ प्रतिमा इति शब्दएव तत्तदाकारेणैव विवर्तते। एतत् वैयाकरणसम्मतं मतं जयन्तभट्टेन न्यायमञ्जर्यामुल्लेखितम् खण्डितं च। यद्यपि तत् तत् संस्कारानुयायि विभिन्नचित्तवृत्तिरूपा प्रतिमा जायते। सा तु अर्थज्ञानजन्या एव नतु शब्दजन्या इति वाक्यार्थः प्रतिमा भवितुमर्हति——

प्रतिमाखलु विज्ञानं तच्चशब्देनजन्यते।

न तुशब्दस्यविषयो रूपाधीरिवचक्षुषः।।१४६

यथावस्थिते वनितात्मनि बाह्यार्थे वासनानुसारेण कुणप इति कामिनीति भक्ष्यमिति प्रतिमा भवन्ति, तथा शब्दार्थेऽपि व्याघ्रागमनेऽवगते शूराणामुत्साहः, कातराणां भयमित्यादि कार्यं भवति। न तु एतावता प्रतिमाशब्दार्थो भवितुमर्हति। इयं तु प्रतिमा यद्यपिशब्देन जन्यते तथापि अर्थजन्यत्वात् अर्थज्ञानजन्यत्वाद् वा न वाक्यार्थः, अपि तु संस्कारानुयायि चित्तवृत्तिरूपा विजातीया बुद्धिरित्युक्तम्। इन्द्रियलिंगाद्यजन्यत्वाच्च प्रतिमा इत्यपिबोध्यम्। इन्द्रियलिंगाद्यजन्यं प्रतिमाज्ञानं यथार्थन्यायसूत्रभाष्यकारयोरपि सम्मतम्। मीमांसकमते तु प्रतिमाज्ञानं शुभादृष्टवशेनोत्पन्नमपि न प्रमाणमर्थं निश्चयायकत्वात्।

लौकिकीप्रतिमा यद्वत् प्रत्यक्षाद्यनपेक्षिनी।

ननिश्चयायपर्याप्ता तथा स्याद्योगिनामपि।।१४७

अद्वैतवेदान्तिना वाचस्पतिमिश्रेणापि प्रतिमाप्रत्ययस्य संदिग्धप्रामाण्यकत्वोक्त्या अप्रमात्वमेवोक्तम्। ततो भिन्नस्य च भावनाधेयस्य साक्षात्कारस्य प्रतिमाप्रत्ययवत् संशयाक्रान्तया प्रामाण्यायोगात्। तद्विधस्य तद्सामग्रीकस्य बहुलं व्यभिचारोपलब्धेः। न खल्वनुमानविबुद्धं बह्निमावयतः शीतातुरस्य शिशिरभरमन्थरकायकाण्डस्य स्फुरज्वालाजटिलानल साक्षात्कारः प्रमाणान्तरेण संवाद्यते।१४८ अत्रापिदृष्टान्तविधया प्रतिमाप्रत्ययस्याप्रामाण्यमुक्तम्। शीतातुरस्यभावनाधेय वह्न्यादि साक्षात्कारो य उक्तः स तु मानसी विभ्रान्तिरेव दोषजत्वाद् विसंवादाच्च।

यद्यपि सर्वेदार्शनिकाः कण्ठतः योगज प्रत्यक्षाणिप्रतिमाज्ञाने नान्तर्भावयन्ति तथापि तानिसांख्य-पातञ्जल-वैशेषिक-जैन-बौद्ध-वेदान्त सम्मतानि फलतः प्रतिमाज्ञानान्येव इन्द्रियलिंगाद्यभावेऽपि साक्षात्कारिज्ञानत्वात् लौकिकप्रतिमा ज्ञानवदिति। अत एव पातञ्जला वैशेषिकाश्च योगजप्रत्यक्षानि प्रतिमानीति वदन्ति। प्रतिमाज्ञानमेवेतिसूक्ष्ममीक्षनीयम्। रामानुजीयानांमते तु भूत भावि वस्तुसाक्षात्काररूपायाः प्रतिमायाः प्रत्यक्षेऽन्तर्भूतत्वात् यथार्थत्वमेव। उक्तं हि यतीन्द्रमतदीपिकायां पुण्यपुरुषनिष्ठा प्रतिमाऽपि प्रत्यक्षेऽन्तर्भूता।१४६ जैनाचार्यमते सा च प्रतिमा बुद्धिमेधाप्रज्ञादिः।१५० एतेनातिज्ञानान्तर्भूतं यथार्थज्ञानमेव सांव्यवहारिकं प्रतिमा इति सूचितम्।

## २-अनुमितौ शाब्दबोधे स्फोटवादे च मनस्तत्वम्।

मानवजीवने लोकयात्रानिर्वहि प्रत्यक्षज्ञानमपरिहार्यम्। तथा अनुमित्यादिपरोक्षज्ञानमपि बौद्धानां मते परोक्षज्ञानमनमनुमिति रूपं समारोपित रोपित सामान्यलक्षण विषयत्वेनार्थक्रियासमर्थस्वलक्षणविषयक प्रत्यक्षज्ञानादपकृष्टम्। विकल्परूपोऽनर्थ एवानुमानस्य ग्राह्यः। अनुमानस्य प्रवृत्तिविषयस्तु अध्यवसितं स्वलक्षणमेव।१५१ जैनानांमतेपरोक्षज्ञानं मतिश्रुतिरूपं विशिष्ट वैशद्याभावात् प्रत्यक्षज्ञानादपकृष्टम्। तन्मतेसांव्यवहारिकप्रत्यक्षाणामपीन्द्रिय सापेक्षत्वादिन्द्रिय व्यवहितत्वाच्च मतिरूपपरोक्षत्वमेव। यद्यपिसंव्यवहारपेक्षया देशतोवैशद्यसंभवादिन्द्रय ज्ञानमपिप्रत्यक्षमिति व्यवह्रियते, तथापिमुख्यं प्रत्यक्षत्वं वैशद्यप्रकर्षयोगादिन्द्रियानपेक्षाणामवधिमनःपर्ययकेवलज्ञानानामेव।१५२ तार्किकानां नैयायिकवैशेषिकानां मतेन इन्द्रियसन्निकर्षजन्यत्वाद् ज्ञानकरणत्वाच्च प्रत्यक्षस्योत्कर्षत्वादिन्द्रिय सन्निकर्षाजन्यत्वाद् ज्ञानान्तरसापेक्षत्वाच्चैव परोक्षज्ञानानामपकर्षः। रामानुजमते नेन्द्रियजन्यत्वमपि तु साक्षत्कारित्वमेव प्रत्यक्षप्रयोजकम्। सांख्यपातञ्जलमतयोः परोक्षस्थलेविषयदेशे विषयंव्याप्यचित्तवृत्तेरभावादन्तर्देशे एव चित्तवृत्तिजननात् सामान्यवधारणात्मकत्वादेव परोक्षज्ञानानां विशेषावधारणात्मक प्रत्यक्षाद् दौर्बल्यं न्यनत्वञ्च। अतएवोक्तं योगभाष्ये विशेषाचधारणप्रधाना वृत्तिः प्रत्यक्षत्वम्।१५३ सांख्यसूत्रेऽपि यतसम्बद्धं सत् तदाकारोल्लेखिविज्ञानं तत् प्रत्यक्षमित्यत्र बुद्धेरिन्द्रियद्वाराबाह्यार्थ सन्निकर्षानन्तरं विषयाकारोल्लेखि ज्ञानस्य प्रत्यक्षत्वकथनात् बाह्यार्थवृत्ति सम्बन्धाभावाद् वृत्तौ विषयाकारानुल्लेख एव परोक्षज्ञानानामनुमिति बाह्यार्थ साधारणे बुध्यर्थ सन्निकर्ष एव कारणम्।इन्द्रियसन्निकर्षास्तु चाक्षुषादिप्रत्यक्षेषु विशिष्टस्यैवकारणानि।१५४ अद्वैतवेदान्तमते तु विषयचैतन्यस्य वृत्यवच्छिन्ने चैतन्यभिन्नत्वमेव प्रत्यक्षत्वप्रयोजकमतो विषयचैतन्यस्य वृत्तिचैतन्याभेदाभाव एव परोक्षज्ञानानां प्रत्यक्षज्ञानादपकर्षहेतुः अनुमितिशाब्दबोधोपमित्यार्थापत्तिरूप परोक्षज्ञानास्थले बुद्धिवृत्तेर्बहिर्विषयदेशे निर्गमनाभावान्न विषयचैतन्यस्य वृत्तिचैतन्याभिन्नत्वं भवति।१५५ येपदार्थाः इन्द्रियग्राह्यत्वभावात् प्रत्यक्षेण न गृह्णन्ते।ये च इन्द्रियग्राह्यत्व योग्यत्वेऽपि कदाचिदिन्द्रयसन्निकर्षाद्यभावान्न प्रत्यक्षेण गृह्णन्ते। ते सर्वेकैश्चिल्लिंगैः साधनभूतैः साध्यत्वेनानुमातुं शक्यन्ते। लोकयात्रानिर्वहि प्रत्यक्षवदनुमितेरप्य परिहार्यत्वं दृष्टमेव। चार्वाकमेकं विहाय सर्वे एव वादिनोऽनुमितेरेव प्रामाण्यं स्वीकुर्वन्ति।बौद्धवैशेषिकाहि शाब्दबोधमप्यनुमितौ अन्तर्भावयन्ति।केचिद्धाप्रत्यक्षमप्यनुमितावन्तर्भावयितुं दुस्साहसं कुर्वन्ति।१५६सर्वथापि सर्वैरेव प्रेक्षावद्भिरनमितिरेव प्रामाण्यं प्राधान्यञ्चस्वीकृतमेव। सेयं दीपज्वाले त्यादिस्थले प्रत्यक्षेणाभेदावगमेऽप्यनुमित्या ज्वालाभेदावगमात् क्वचित् प्रत्यक्षादपि प्राबल्यमनुमितेः स्वीकार्यमिति। चार्वाकाः स्वभाववादिनश्च अज्ञातदेशे

काले वा व्यभिचारसंभवात् व्यभिचारशंकया साध्यसाधनयोर्व्याप्ति निश्चयस्यैवानुमितिकारणभूतस्यासंभवादनुमितेरपि न संभवः कथञ्चिदनुमिति संभवेऽपि संशयात्मकत्वाद् न तस्यप्रामाण्यमिति वदन्ति। ते घट्टकुट्टिप्रभात न्यायेन पनरनुमितिमेव शरणं व्रजन्तः अनुमानप्रमाणमेव ख्यापयन्ति। नप्रकारान्तरेणाप्यनुमितेरप्रमात्वमनुमानस्याप्रमाण्यं वा शंकयते। यथेक्तं न्यायसूत्रे रोधोपघात सादृश्येभ्यो व्यभिचारादनुमान प्रमाणमिति।१५७
रोधादपि नदीपूर्णागृह्यते तदाचोपरिष्टाद् वृष्टोदेव इति मिथ्यानुमानम्। नीडोपघातादि पिपीलिकाण्डसञ्चारो भवति, तदा च भविष्यति वृष्टिरिति मिथ्यानुमानं भवतीति। तदा च भविष्यति वृष्टिरिति मिथ्यानुमानमिति। पुरुषोऽपि मयूरवासितमनुकरोति, तदापि सादृश्यान्मिथ्याऽनुमानं भवतीति।१५८ तथा च प्रायशः व्यभिचारादनुमानं न प्रमाणमिति भावः। उक्तं च भाष्ये नायमनुमानव्यभिचारः। अनुमाने तु खलु अयं अनुमानाभिमानः। कथम्? नाविश्ष्टिो लिगं भवितुमर्हति।पूर्वोदकविशिष्टं खलु वर्षोदकं शीघ्रतरत्वं स्रोतसो बहुतरफेन फलपर्णकाष्ठादि बहुलञ्चोपलभमानः पूर्णत्वे नद्या उपरिवृष्टौदेव इत्यनुमितिर्नोदक वृद्धिमात्रेणेत्यादि।१५९ भूतवर्तमानभविष्यत पदार्थ विषयत्वादनुमितिस्त्रिकाल विषया वेतितव्या।लिंगमपिसाधनरूपं अतीतवर्तमानागत कालीनं त्रिविधमेव भवितुमर्हति। एवं च कस्यचिद्पुरुषस्य क्वचिद् धूमादिलिंगज्ञानान्तरं तेन लिंगेनाव्यभिचारितसाहचर्य रूपव्याप्ति सम्बन्धेन सम्बद्धस्याग्नेः तत् सम्बन्धस्य बह्निमानिति। सम्बन्धज्ञानवतः एक सम्बन्धिज्ञानमपर सम्बन्धिनः सम्बन्धस्य च स्मारकमिति नियमात्। तदनन्तरं बह्निव्याप्तिविशिष्टधू- मवानयमिति तत्र पर्वतादौ व्याप्ति विशिष्टलिंगपरामर्शोभवति। तदनन्तरं च पर्वतोऽयं बह्निमानिति तस्य स्वानुमितिर्भवति। तत्रलिंगदर्शनलिंगज्ञानं वा प्रथमलक्षणवर्तिकारणं व्याप्तिस्मरणमेवासाधारण कारणत्वालिंग परामर्शरूप व्यापारवत्वाच्चानुमितौ करणमनुमान प्रमाणमुच्यते। तादृशकरणजन्य लिंगापरामर्शो व्यापार उच्यते। कार्य तु तत्रानुमितिरेवेति तार्किकाणामनुमिति प्रक्रिया।१६० जैनानांमते तु ऊहरूपेण मतिज्ञानेनैव कतिपय बह्निधूमसहचारदर्शनात् सकलबह्निधूमविषयकं व्याप्तिविषयकं ज्ञानं जायते। तदुक्तंभास्करनन्दिना तत्वार्थवृत्तौ देशान्तरेकालान्तरे च यावान् कश्चिद्धूमः सर्वोऽप्यग्निजन्मा, अनग्निजन्मावा न भवतीति व्याप्तिग्रहणमूहाख्यं सम्यग्ज्ञानं कथ्यते।१६१ यद्यपि लिंगज्ञानं व्याप्तिस्मरणलिंगपरामर्शेभ्यः एव स्वार्थानुमितिर्जायते। तथापि परं प्रत्यापयितुं परार्थानुमितिः पञ्चावयात्मकं न्यायप्रयोगमपेक्षते। तथाहिप्रथमं प्रतिज्ञावाक्यं 1-पर्वतो बह्निमानिति! द्वितीयं हेतुवाक्यं 2-धूमादिति, तृतीयमुदाहरणवाक्यम्3-यो योधूमवानस बह्निमान्, यथा महानसमिति। चतुर्थमुपनयवाक्यं 4- बह्निव्याप्यधूमपर्वतः। एतेभ्यःपञ्चावयववाक्येभ्यः परोऽपि धूमेन लिंगेन पर्वते बह्निमनुमिनोतीति पञ्चावयववाक्यानि परस्यानुमिति हेतुर्भावयन्ति अद्वैतवेदान्तमते तु स्वार्थानुमिति स्थले लिंगदर्शनात् व्याप्तिसंस्कारबोधे सति तस्मादेव

पर्वतो बह्नि मानित्यनुमितिसंभवे पूर्वभूतव्याप्तिज्ञानं कारणं तत् संस्कारोऽवान्तर व्यापारः, लिंगदर्शनेनव्याप्तिसंस्कारोद्बोधश्च सहकारिकारणमित्यनुभवसिद्धं कारणत्वकल्पनालाघवञ्च। क्वचिद् व्याप्ति स्मृति परामर्शसत्वेऽपि सर्वत्रानुमितौ तदभावात् तयोः कारणत्वकल्पनं निरर्थकम्।१६२ बौद्धानां मतेऽपि स्वार्थ परार्थ चेति द्विविधमनुमानं तत्र स्वार्थत्रिरूपलिंगाद् यदनुमेयेज्ञानं तदनुमानम्।१६३ इति धर्मकीर्तिनोक्तम्। उक्तं च टीकायाम्—'त्रिरूपाल्लिंगाद् यदुत्पन्नमनुमेयालम्बनम् ज्ञानं तत् स्वार्थमनुमानमिति।१६४ त्रैरूप्यं पुनः लिंगस्य
1-लिंगस्यानुमेये सत्वमेव 2-सपक्षे एव सत्वम् 3-असपक्षेचासत्वमेव निश्चितम्।१६३ एवं तन्मते लिंगस्य हेतोः सपक्षसत्व-विपक्षासत्व पक्षवृत्तित्व निश्चयादेवानुमेये स्वार्थानुमितिर्भवति। अविनाभावनियमस्य व्याप्तेः स्वभावमूलकत्वाद् कार्य-कारणभावमूलकत्वाच्च नानावगतदेशकाले व्यभिचारशंकाभवति। तदुक्तं कार्यकारणभावाद्वा स्वभावाद्वा नियामकाद् अविनाभावनियमो१६४ इत्यादि। बौद्धवैशेषिकानांमते अनुमितौ एव अन्तर्भावसंभवात् शाब्दबोधो न पृथगिति।
वचोभ्योनिखिलोभ्योऽपिविवक्षेषाऽनुमीयते।
प्रत्यक्षानुमानाभ्यां तद्धेतुः साहिनिश्चिता।।१६५
कार्येण वचसा लिंगेन पुंसिधर्मिणिविवक्षा अनुमेया इति भावः। तथा चवैशेषिकैरपि शाब्दबोधं लैंगिकज्ञाने अनुमितावन्तर्भावयन्ति। तथा चोक्तं कणादेन वैशेषिकसूत्रे एतेनशाब्दंव्याख्यातमिति।१६६ एतेनलैंगिकज्ञानकथनेन शाब्दं शब्दज्ञानजन्यं ज्ञानमपि कथितमित्यर्थः उक्तं च प्रशस्तपादेनभाष्ये 'शब्दादीन नामप्यनुमानेऽन्तर्भावः समानविधित्वात्। यथा प्रसिद्धसमस्यासन्दिग्ध लिंगदर्शनप्रसिध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेव शब्दादिभ्योऽपि। यथा व्याप्तिबलेनानुमानं प्रवर्तते। तथा शब्दादयोऽपीत्यर्थः। शब्दोऽनुमानं व्याप्तिबलेनार्थ प्रतिपादकत्वात् धूमवत्। पुरुषो धर्मी ककुदादिमर्थविवक्षावान गोशब्दोच्चारण कर्तृत्वादहमिवेति।१६७ एवं बौद्धवैशेषिकानां मतयोः शाब्दज्ञानमनुमतिरेव, पुरुषेधर्मिणितादृशशब्दोच्चारण कर्तृत्वेनहेतुना तादृश विवक्षायाः अनुमितिसंभवात्। न्यायसूत्रकारेण गौतमेन तु तन्मतं न स्वीकृतम् तदुक्तं सूत्रे 'आप्तोपदेशसामर्थ्याच्छब्दार्थे संप्रत्ययः।१६८ व्याख्यातं च भाष्ये वात्स्यायनेन स्वर्गः, अप्सरसः, उत्तराः,कुरवः,सप्तद्वीपाः, समुद्रः,लोकसन्निवेशः, इत्येवमादेर प्रत्यक्षस्यार्थस्य न शब्दमात्रात् प्रत्ययः। किं तर्हि? आप्तैरयमुक्तः शब्दः इत्यतः संप्रत्ययः। विपर्ययेण संप्रत्ययाभावात् न त्वेवमनुमानम्।१६६
पदसमूहरूपस्यवाक्यस्य ज्ञानमेवप्रायशः प्रत्यक्षात्मकं शाब्दबोधस्यासाधारणं व्यापारवद्वा कारणं भवति। शक्तिलक्षणाऽन्यत् वृत्या पदजन्यपदार्थस्मृतिरेव तत्रव्यापारः। अत्रैवपदजन्यपदार्थस्मृतौ शक्तिज्ञानं सहकारितया कारणं भवति। अस्मात् पदादयमर्थोबोद्धव्य इति संकेतरूपः। मीमांसकमते तु शब्दस्य नित्यत्वात् नित्यशब्देन सह अर्थस्यजाते सम्बन्धः स्वाभाविक एव नित्यः। सर्वथापि पदार्थानामन्वयबोधरूप

शाब्दबोध एव तत्र परोक्षप्रमितिरूपं कार्य भवति।शब्दप्रमाणजन्यवाक्यार्थज्ञाने सन्निधि योग्यताकांक्षाज्ञानमपि सहकारि कारणरूपेणापेक्षितम् तथा हि प्रभवति। शब्दप्रमाणजन्यवाक्यार्थज्ञाने तथाहि प्रहरे-प्रहरे उच्चार्यमानानिगायनमेत्यादि पदानिसन्निधिज्ञानमभावान्नशाब्दबोधंजनयन्ति। तथा बह्निनासिञ्चतीत्यादि पदानियोग्यताज्ञानाभावात् गां हस्तीदण्डेनेत्यादि पदान्याकांक्षाज्ञानाभावान्न शाब्दबोधं जनयन्ति पदज्ञान-शक्तिज्ञान-सत्वेऽपि। यत्र द्वयर्थबोधक शब्दप्रयोगात् कारणान्तराद्वा वाक्यार्थे संशयस्तत्रतात्पर्यज्ञानमपि शाब्दबोधे हेतुः यथा सैन्धवमानय इत्यादि वाक्यं प्रकरणादिना तात्पर्यज्ञानेसति लवणमश्वं वा बोधयति तात्पर्यानुसारेण । सर्वत्रैव शाब्दबोधे तात्पर्यज्ञानं कारणमित्यपि केचिद्वदन्ति। तात्पर्य हि तार्किकमते वक्तुरभिप्रायः मीमांसकमते तादृश प्रतीतिजननयोग्यत्वं बोध्यम्। अत्र स्मृतानामर्थानां पदैरभिहितानामाकांक्षायोग्यतादि वशाद् युगपत् क्रमशो विशिष्ट वैशिष्टरीत्या वा अन्वयबोधो भवतीति अभिहितान्वयवादिनां नैयायिकप्रभृतीनां मतम्।१७० वृद्धव्यवहारात् कार्यान्वितस्वार्थे अन्वितस्वार्थे वा पदानां शक्त्यवधारणादान्वितानामेवार्थानां पदैः स्मरणात् तेनैव प्रकारेण सकलपदार्थानामन्वयबोध इत्यन्विताभिधानवादिनां मीमांसकादीनांमतम्। पतञ्जलिपाणिनिप्रभृतयः तावद्वर्णाभिव्यंग्यान् नादाभिव्यंग्याद्वा स्फोटाद्बुद्धिग्रह्यादेवार्थ प्रत्यय इति वदन्ति। कस्तर्हिशब्दोऽयं योऽर्थप्रत्यायति। 'येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतीतपदार्थकोलोके ध्वनिः,शब्द इत्युच्यते।१७१ इति पाणिनीयमहाभाष्यकार मतम्। योगसूत्रभाष्येऽपि उक्तं व्यासेन वाक् वर्णेषु एवार्थवती, श्रोत्रं च ध्वनिपरिणाम मात्रविषयम्।पदं पुनर्नादानुसंहारबुद्धिनिन्द्रियग्राह्यम्।१७२ पुनश्चोक्तं तेनैव तदेतेषामर्थ संकेतेनावच्छिन्नानामुपसंहृतध्वनिक्रमाणां य एकोबुद्धि निर्भासस्तत् पदं वाचकं वाच्यस्य संकेत्यते। तदेकं पदमेक बुद्धिविषयकप्रयत्नाक्षिप्तम् भागक्रमवर्ण बौद्धमन्त्यवर्णप्रत्ययव्यापारोपस्थापितम्।१७३ अयमेवबुद्धिर्निग्राह्योऽविभाज्योऽवर्णात्मकः वाचकशब्दः स्फोटइत्युच्यते। स तु तत् तत् वर्ण संस्कारसहितान्त्य वर्णप्रत्ययेन बुद्धौअभिव्यज्यते। परमलघुमञ्जषायामुक्तं च नागेशभट्टेन'ननु कस्तर्हिवृत्याश्रयः शब्दः? स स्फोटात्मक इतिगृहाण। चतुर्विधाहिवागस्ति परा,पश्यन्ती, मध्यमा,वैखरी चेति।तत्र मूलाधारस्थपवनसंस्कारीभूतामूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणापरावागुच्यते। नाभिपर्यन्ततमागच्छता तेनवायुनाभिव्यक्ता मनोगोचरीभूता पश्यन्तीवागुच्यते। एतद्वयं वाग् ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पक ज्ञानविषय इत्युच्यते। ततो हृदपर्यन्तमागच्छता तेनवायुनाभिव्यक्ता तत्तदर्थवाचकस्फोटरूपाश्रोत्रमागच्छता तेनवायुनोर्ध्वमाक्रमता च मूर्धानमाहत्य परावर्त्य च तत्तत्स्थानेषु अभिव्यक्ता परश्रोत्रेणापिग्राह्या वैखरीवागुच्यते।
वैखर्याहिकृतोनादःपरश्रवणगोचरः।

मध्यमयाकृतोनादःस्फोटव्यंजकमुच्यते।।174

स्फोटतत्वमेतत् सविस्तरेण निरूपितं श्रीधरेण न्यायकन्दल्यां पूर्वपक्षरूपेण। तदुक्तं वदन्ति स्फोटोऽर्थं प्रतिपादयन्ति यदिहि वर्णनातिरिक्तं पदं पदानतिरिक्तं वाक्यम्, तदाऽर्थप्रत्यय एव नस्यादिति। तथाहि न वर्णाः प्रत्येकमर्थविषयां धियामाविर्भावयन्ति शेषवर्णवैमर्थ्यात्। समुदायश्च तेषां न संभवति, अन्त्यवर्णग्रहणसमये पूर्वेषामसंभवात्। नित्यत्वात् वर्णानामस्ति समुदाय इति चेत? तथापि प्रत्यायकत्वे सर्वदाऽर्थप्रतीति प्रसंगः। पूर्वगताः वर्णाः स्मृतिरपिक्रमभाविनी तदा नास्ति वर्णसाहित्यम्, तृतीयवर्णग्रहणकाले प्रथमवर्णस्मृति विलोपात् युगपदुत-पादस्तु स्मृतीनामनाशंकनीय एव, ज्ञानयौगपद्य प्रतिषेधात्। उक्तं च मण्डनमिश्रेण स्फोटसिद्धौ ननुवर्णाएवाभिधेयाधिगमनिमित्तं स्वाभिधेया व बोधावधिलब्ध परिच्छेदाः पदपरिकल्पनाभाजः नतु स्फोटात्मा इति भावः नैतत् सारम्।175 शब्दो हि स्फोटः ततोऽन्यानि शब्दान्तराणि वर्णादीनि व्यञ्जकध्वनि सादृश्यात्तु तानि गृह्णन्ते। ननु तु तत् तत् वर्णजनितसंस्कार सहितान्त्यवर्णोवाचकः स्यादिति तादृश संस्कार सहित चरमवर्ण प्रत्ययस्यैव स्फोटाभिव्यञ्जकस्यार्थ प्रत्यायकत्वे निरर्थिका स्फोटकल्पनेति चेन्न।

## ल-मानसभ्रान्तिनिरूपणम्

मानसीभ्रान्तिःविभ्रान्तिरित्युच्यते। भ्रान्तिर्हि पुनर्द्विविधा भवति बाह्येन्द्रियजा मानसी च। बाह्येन्द्रियजा भ्रान्तिरधिष्ठान सन्निकर्षादधिष्ठान देशे एव भवति। मानसीभ्रान्तिस्तु सादृश्याद्यभावेऽपि कामरोगादिवशेन यत्र कुत्रचिदेव संभवति। भास्वररूपसादृश्येन हि विषयदोषेण शूक्तिका रजतमिति परिस्फुरति मरुस्थलपतितोत्फलितं सावित्रं तेजः तरल-तरंग सारूप्येण पय इति चकास्ति। इन्द्रियदोषादपि पित्तोपहतरसनस्य तिक्ततया शर्कराऽवभासते। तिमिरसीमन्तिनयन वृत्तेश्चन्द्र मण्डलमेकमपि द्विधा प्रतिभातीत्यादिना ग्रंथेन विषयदोषजेन्द्रिय दोषजान् भ्रमान् निरूप्याह——

अन्तःकरणदोषेनविभ्रमो यस्तुजायते।<br>
असत्यपिमहेलादौपुष्पेषु मुषितात्मनाम्।।<br>
सोऽपिकश्चिद्विषयदोषजा भवतिकुत्रचित्।<br>
कोमलानिलकल्लोलवेल्लिते बालपल्लवे।।<br>
अनपेक्षित तत्तुल्यपदार्थस्यैव या पुनः।<br>
मानसीमन्मथोन्मादमहिम्नामानिनीमतिः।।176

एषा हि मानसीभ्रान्तिः सर्वेषामेव सम्मताः। अप्रमाण्यं च तस्याः सर्वेषामेव सम्मतम्।यश्चभावनाधेयदेवतादिसाक्षात्कारस्तस्यापि प्रायशः मानसभ्रान्तिरूपत्वमेवास्थेयम्, विसंवादान्निरधिष्ठानत्वाच्च, शीतातुरस्य बह्निसाक्षात्कारवत्।

## व-स्वप्ननिरूपणम्।

प्रश्नोपनिषदि भगवान् एतस्मिन् पुरुषे कानि स्वपन्ति कान्यस्मिन जाग्रति कतर एष देवः स्वप्नान् पश्यति कस्यैतत् सुखं भवतीत्यादौ अवस्थात्रयस्योल्लेखो दृश्यते।177 'एवं हवैतत् सर्व परेदेवे मनस्येकीभवति। तेन तर्ह्येष .पुरुषो न स्वपितीत्याचक्षते।178 इत्यत्र सुषुप्तिवर्णनं दृश्यते। पुनश्च प्राणाग्नय एवैतास्मिन् पुरे जाग्रति इत्युक्त्वा इन्द्रियाणां व्यापारकालीनावस्था जाग्रदिति सूचितम्। उपनिषदि यद्यपिप्रधानतः अवस्थात्रयमेव सर्वत्राम्नायते तेषामेवात्मोपलब्धुपयोगित्वात् तथा मूर्च्छामिरणरूपमवस्थान्तरद्वयमपि लोकेशास्त्रे चोपलभ्यते। तयोरपिनिरूपणं यथाक्रमं क्रियते मनस्तत्वविज्ञाने उपयोगितत्वादिति। कैवल्योपनिषदि जाग्रतस्वप्नसुषुप्तावस्थानां पृथकश्लोकैर्निरूपणं श्रूयते।

स एव मायापरिमोहितात्माशरीरमास्थाय

शरीरमास्थाय करोति सर्वम्।

स्त्रीअन्नपानादिविचित्रभोगैः

स एव जाग्रतपरितृप्तिमेति।।179

अत्र हि उपनिषन्मतानुसारेण स्वरूपतः शुद्धस्यजीवस्य जाग्रदाद्यवस्थालाम हेतुं मायाग्रस्तान्तःकरणपरिच्छेदं शरीरावयवलम्बनञ्चोक्त्वा स्त्री अन्नादिबाह्य भोगावस्थायाः एव जाग्रतत्वमभिहितम्। यथामाण्डूक्योपनिषदि जागरितावस्था विशिष्टस्य वैश्वानरस्य विश्वस्य च जीवस्य बहिः प्रज्ञत्वमेकोनविंशतिमुखत्वं स्थूलभोक्तृत्वञ्चोक्तम्।180

एतेनजाग्रतवस्थायाः लक्षणमपिसूचितम्। व्याख्यातश्च तत् शंकराचार्येण जागरितं स्थानमुस्येति जागरितस्थानः। बहिः प्रज्ञः स्वात्मव्यतिरिक्त विषये प्रज्ञा यस्य तथैकोनविंशति मुखान्यस्य बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च दश वायवश्च प्राणादयः पञ्च मनोबुध्यहंकाराश्चित्तमपि मुखानि तान्युपलब्ध द्वाराणीत्यर्थः। स एवं विश्ष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन्स्थूलान् विषयान् भुंक्ते इति स्थूलभुक्।181 एतेन जाग्रदवस्थायाः अपि विवरणं कृतम्। इन्द्रियादिजन्यविषयज्ञानावस्था जाग्रदिति सूचितम्।तथैवाद्वैतवादिभिरप्युपनि षन्मतानुसारेणैव जाग्रद् लक्षणं कृतम्। अभिमानिनो जीवस्य जाग्रत स्वप्न सुषुप्ति मूर्च्छामरणभेदात् जीवस्यावस्थाः पञ्च भवति। सांख्यमतेऽपि जाग्रल्लक्षणमुक्तम् विज्ञानभिक्षुणा 'सुषुप्ताद्यसाक्षित्वमिति सूत्रभाष्ये'182 तत्रसुषुप्ताद्यवस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वमेति पुंसि इत्यभिधाय जाग्रल्लक्षणमुक्तम्। तत्रजाग्रन्नामावस्थेन्द्रिय द्वारा बुद्धिर्विषयाकारपरिणामः।183 एतन्मते स्मृतिमानसभ्रमादीनामपि मनोरूपेन्द्रियजन्यत्वान्न तत् काले जाग्रत्वानुपपत्तिः पातञ्जलेऽप्येवमेव जाग्रल्लक्षणमुक्तम्।जाग्रन्नामावस्थेन्द्रिय द्वारा एव बुद्धिर्विषयाकारपरिणामः। 'उपनिषदि यथा जाग्रदवस्थायाः निरूपणं कृतं वर्तते तथैव स्वप्ननिरूपणमपिकृतं वर्तते। माण्डूक्येतावत् आत्मनोद्वितीयपादस्य तैजसस्योपन्यासस्थले

स्वप्नस्थानस्य तस्यान्तः प्रज्ञत्वं प्रविविक्त भोक्तृत्वञ्चाभिहितम्।184 एतेन स्वप्नावस्थायाः लक्षणमपि सूचितम्। व्याख्यातञ्च शंकराचार्येण जाग्रतप्रज्ञानेकसाधना बहिर्विषयैवावभासमाना मनः स्पन्दन मात्रा सती तथाभूतं संस्कारं मनसि आधत्ते। तन्मनसस्तथा संस्कृतम् चित्रित इव पटो बाह्यसाधनानपेक्षमाविद्याकामकर्मभिः प्रेयमानंजाग्रदवभासते। इन्द्रियापेक्षयाऽन्तस्थत्वान्मनसस्तद्वासनारूपा च स्वप्नेप्रज्ञा यस्येऽत्यन्तःप्रज्ञः। विषयशून्यायां प्रज्ञायां केवलप्रकाशरूपायां विषयित्वेन तैजसः। विश्वस्य सविषयत्वेन प्रज्ञायाः स्थूलायाः भोज्यत्वम्। इहपुनः केवलावासनामात्रा प्रज्ञा भोज्येति प्रतिविक्तो भोग इति।185 अत्रापि व्याख्याने स्वप्नावस्थायाः जाग्रदवासनामयत्वं चित्रितपटवत् संस्कारविशिष्टस्य मनसः स्वप्नेऽवस्थानं तथा विषयशून्यत्वमित्याभिहितम्। इन्द्रियजन्यवासनामय विषयभोगावस्था स्वप्न इत्यपि सूचितम्। तत्र वृहदारण्यकोपनिषदि स्वप्ने जीवस्यान्तः शरीरमहिमानुभावं वर्णयति 'सयत्रैतत् स्वप्नया चरति ते हि अस्य लोकास्तदुतेव महाराजो भवत्युतेवमहाब्राह्मणः स यथामहाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्तेतैवयेवैष एतत् प्राणान् गृहीत्वा स्वेशरीरे यथाकामं परिवर्तते।186 तथा स्वप्ने आत्मनो जाग्रत संस्कारैः स्वाप्नविषयाणां स्वयं निर्मातृत्वं ज्योतिरन्तरविविक्तञ्च स्वयं ज्योतिष्टं प्रदर्शितम् " स यत्र प्रस्वापितस्य लोकस्य सर्वावतो मात्रामादाय स्वयं विहत्य स्वयं निर्माय स्वेनभाषा स्वेनज्योतिसा प्रस्वपिति अत्रायं पुरूषः स्वयं ज्योतिर्भवति।"187 स्वप्नेबाह्यविषयाभावेऽपि तेषां स्वयं निर्मातृत्वमेववाह 'नतत्र रथा न रथयोगा न पन्थानो भवन्त्यथरथान् रथयोगान् पथः सृजते, न तत्रानन्दा मुदः प्रमुदो सृजते। न यत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते सहि कर्ता।188 अत्र स्वप्ने रथादीनामभाव कथनात् न हि तत् स्वयं निर्माणं वास्तवी सृष्टिः अपितु प्रातिभासिक सृष्टिरेव बोध्या। अन्यत्र च वृहदारण्यके "ता वा अस्यैताहिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठन्ति शुक्लस्यनीलस्य हरितस्यलोहितस्य पूर्णाः अथ यत्रैनं घ्नन्तीव जिनन्तीव ——गर्तमिवपतति यदेव जाग्रदभयं पश्यति तदत्रा विद्यया मन्यते।"189 इत्युक्त्वा स्वप्नज्ञानस्य स्वप्नवहनाडीयोगाविद्याजन्यत्वञ्चाभिहितम्। "स्वप्ने सजीवः सुख-दुःखभोक्ता स्वमायया कल्पितजीवलोके।"190 अत्र स्वमायया कल्पितत्वोक्तेः स्पष्टमेवस्वाप्न विषयाणां जीवकल्पितत्वमिति। उक्तं च शंकरमिश्रेण कणादरहस्ये अथस्वप्नः।स च सिद्धोपयुक्तान्तः करणजन्यं ज्ञानम् सिद्धा च निद्रा यदास्वप्नवह नाडीमध्यवर्तिमनस्तदा बहिरिन्द्रियसम्बन्ध विरहात् स्वप्नज्ञानानि जायन्ते।191 निद्रादुष्टान्तःकरणजं ज्ञानं स्वप्नः। योगजधर्मानुगृहीतस्य मनसो निरिन्द्रियप्रदेशावस्थानं निद्रा इति। आयुर्वेदेरकसंहितायां मनोवहानां स्रोतसामपि वातपित्तश्लेष्मदोषजन्य दारूण स्वप्न स्थानत्वमुक्तम्——

मनोवहानां पूर्णत्वाद्दोषैरतिबलैस्त्रिभिः।

स्रोतसांदारुणानुस्वप्नानुकालेपश्यतिदारुणे।।
नातिप्रसुप्तः पुरुषः सफलान फलानपि।
इन्द्रियेशेनमनसा स्वप्नानुपश्यनेकधा।।191

कारणभेदात् स्वप्नानां त्रैविध्यंभवति संस्कारपाटवात् तावत् कामीकुद्धोवा यदा यमर्थमादृतश्चिन्तयनुस्वपिति तदा सैवचिन्ता सन्ततिः प्रत्यक्षाकारा सञ्जायते। धातु दोषात् वात् प्रकृतिस्तद् दूषितो वा आकाशगमनादीन् पश्यति। पित्तप्रकृतिः पित्तदूषितो वाग्निप्रवेशकनकपर्वतादीन् पश्यति। पित्तप्रकृतिः चित्तदूषितो वाग्निप्रवेशकनकपर्वतादीन् पश्यति । श्लेष्मप्रकृतिः श्लेष्मदूषितोवा सरित् समुद्रप्रस्तरण हिमपर्वतादीन् पश्यति। यत् स्वयमनुभूतेष्वननुभूतेषु वा प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा यत् शुभावेदकं गजारोहण छत्रलाभादितत् सर्वं संस्कारधर्माभ्यां भवति। विपरीतं च तैलमञ्जन खरोष्ट्रारोहणादि तत् सर्वधर्म संस्काराभ्याम् भवति। गौतमीयन्यायसूत्रेषु यद्यपि स्वप्नाद्यवस्थालक्षणं न कृतम्। तथापि सूत्रेषुदृष्टान्तरूपेण स्वप्नस्योल्लेखः कृतः वर्तते। 'यथा च स्वप्ने नविषयाः सन्ति, अथचाभिमानो भवति स्वप्नान्ते विषयाभिमानवत् प्रमाणप्रमेयाभिमानः कश्चित् स्वप्नो भयोपसंहितः कश्चित् प्रमोदोपसंहितः काश्चिदुभयविपरीतः कदाचित् स्वप्नमेव न पश्यतीति निमित्तवतस्तु स्वप्नविषयाभिमानस्य निमित्तविकल्पात् विकल्पोपपत्तिः।192 अथवैशेषिकमते प्राचीनन्यायमते च स्वाप्नज्ञानस्य मानसभ्रमरूपत्वमेव बोध्यं पूर्वानुभवजन्यसंस्कारजन्यत्वञ्च। केशवमिश्रेण तु तर्कभाषायां स्वप्नस्यायथार्थ स्मृतिरूपत्वमभिहितम्।193 तत्र प्रमाणविपर्यय विकल्पा जाग्रदवस्था ते एव तदनुभवबलात् प्रत्यक्षायमानाः स्वप्नाः।194 रामानुजादिवैष्णवमते स्वप्नादिज्ञानं तु सत्यमेव तत् तु पुरुषानुभाव्यतया तत्तत्कालावसानान् रथादीन् परमपुरुषः सृजतीति श्रुत्यावगम्यते।195 स्वप्ने रथपुष्करिण्याद्यर्थजातं मायामात्रं परमपुरुषसृष्टमित्यर्थः माया शब्दो हि आश्चर्यवाची । अथ रथान् रथयोगात् पथःसृजते-स्वप्नदृगनुभाव्यतया तत् कालमात्रावसानान् सृजते इत्याश्चर्य रूपत्वमेवाह। एव विधाश्चर्यरूपासृष्टिः सत्यसंकल्पस्य परमपुरुषस्यैवोपपद्यते। न जीवस्यकामं कामं पुरुषो निर्मिमाण इति च परमपुरुषमेव निर्मातारमाह-सृजतेस हि कर्ता इति च तया श्रुत्यैकार्थत्वात् परमपुरुषमेव कर्तारमाह।उक्तं च मध्वाचार्येण—
मनागतांस्तु संस्कारानुस्वेच्छयापरमेश्वरः।
प्रदर्शयति जीवायसस्वप्न इति गीयते।।196

प्रभाकरादीनां मते यद्यपिशूक्तिरजतादि भ्रमस्थले अनुभवस्मरणयोर्विवेकाग्रहणं सदृशदर्शनादि विना स्मृतिरेव कुतस्येति चेन्न नानाकारणकत्वात् स्मरणस्यनिद्राकषायितमध्यन्तः करणं स्मरणकारणं भवत्येव।197 एवं प्रभाकरादीनां मते स्वप्नज्ञानं यथार्थस्मृतिरूपमेवेति बोध्यम्। मन्त्रदेवताद्रव्य विशेषनिमित्तत्वाच्च

केचित् स्वप्नाः सत्यार्थ गंधिनो भवतीति मन्यन्ते। केचिद् स्वप्नाः शुभसूचकाः केचिच्चाशुभ सूचकाः अपि भवन्ति।

## संदर्भग्रंथाः


26-ऋग्वेदे:: १०:१६१:२,३
२७-ऋग्वेदेपरिशिष्टे:: ३३
२८-शुक्लयजुर्वेद :: ३४:४
२९-बृहदारण्यकोपनिषद्:: ४:४:१९
३०-ब्रह्मबिन्दूपनिषद् :: १:२
३१-बृहदारण्यकोपनिषद्:: १:५:३
३२-तदेव :: ४:१:६
३३-तदेव :: ५:६:१
३४-नृसिंहोपनिषद् :: १
३५-नृसिंहोपनिषद् :: १
३६-नृसिंहोपनिषद् :: १
३७-सांख्यकारिका ::४
३८-शुक्लयजुर्वेद :: 10::90:13
३९-बृहदारण्यकोपनिषद्:: 1:3:16
४०-कठोपनिषद्:1:3:3 :
४१-वैशेषिकदर्शनवृत्तिः ::१०:२:६
४२-न्यायसूत्र ::1:1:16
४३-वैशेषिकसूत्राणि :: 3:2:1
४४-प्रमेयरत्नमाला पृष्ठ ७१
४५-बोधिसत्वविवरण पृष्ठ-५0
४६-सांख्यसूत्र ::२:१८
४७-श्रीमद्भगवद्गीता ::३:४२
४८-कठोपनिषद् :: १:३:३
४९-कठोपनिषद् :: १:३:४,२:१:३
५0-कठोपनिषद् :: २:२:८
५१-न्यायसूत्रभाष्य:: १:१:६
५२-छांदोग्योपनिषद्:: 3:14:3
५३-प्रश्नोपनिषद् ::: 3:6
५४-श्वेताश्वरोपनिषद् :: 3:13
५५-भासपति पृष्ठ 205
५६-सिद्धान्तमुक्तावली पृष्ठ-205

५७-ब्रह्मबिन्दूपनिषद् पृष्ठ ११
५८-सर्वदर्शनसंग्रहः: चार्वाक
५६-वृहदारण्यकोपनिषद्::३:६:४
६0-न्यायसूत्रभाष्य ::३:१:५८
६१-वैशेषिकसूत्र ::४:२:१
६२-इविड ::पृष्ठ 37-38
६३-वृहदारण्यकोपनिषद् ::2:3:16
६४-तत्वसूत्रः: 2:19
६५-चरकसंहिता::1:८:७
६६-इविड ::1:८:८
६७-कठोपनिषद्:: 1:3:3
६८-छांदोग्योपनिषद् ::८:1:1
६६-गर्भोपनिषद्:: 1:1
७0:-गर्भोपनिषद्:: 1:3:4
७१-सांख्यसूत्रभाष्य :: 3:8
७२-सांख्यसूत्रभाष्य ::5:103
७३-छांदोग्योपनिषद् ::6:9:3
७४-वृहदारण्यकोपनिषद् ::1:5:3,4:3:7
७५-एतरेयोपनिषद्भाष्य ::3:1:2
७६-एतरेयोपनिषद्भाष्य ::3:2
७७-प्रश्नोपनिषद् :: 4:8
७८-प्रश्नोपनिषद् ::3:6
७६-बृहदारण्यकोपनिषद् ::4:3:20
८0-गार्भोपनिषद् ::1:5
८१-सुश्रुत :: 7:4
८२-चरक :: 4:7
८३-चरक :: 5:5:40
८४-चरक :: 5:5:40
85-चरक :: 2:7:3
86-सुश्रुत :: 7
87-सुश्रुत :: 7
88-तर्कसंहिता ::पृष्ठ ४४
89-सिद्धमुक्तावली पृष्ठ-246
90-तर्कभाषा :: पृष्ठ-191

91-योगसूत्रभाष्य :: 2:2:20
92-अभिधानकोश :: 1:16
93-तर्कसंहिता पृ0 ::122
94-वैशेषिकसूत्र :: 2:2:17
95-न्यायबोधिनी पृष्ठ-78
96-युक्तिदीपिका पृष्ठ-5
97-सिद्धान्तमुक्तावली :: पृष्ठ-490
98-तर्कभाषा ::पृष्ठ-189
99-न्यायबोधिनी:: पृष्ठ-79
100-न्यायसूत्रवृत्तिः
101-सर्वदर्शनकौमुदीपृष्ठ-32-33
102-पातञ्जलयोगसूत्र :: 1:6
103-पातञ्जलयोगसूत्र :: 1:9
104-पातञ्जलयोगसूत्र :: 1:9
105-पातञ्जलयोगसूत्र :: 1:2
106-सिद्धान्तमुक्तावली :: 531:32
107-न्यायभाष्य :: 4:1:58
108-चार्वाकदर्शन :: पृष्ठ-3
109-वैशेषिकसूत्र :: 5:2:45
110-न्यायसूत्र :: 1:1:20
111-गीता :: 18-36:39
112-भावपरिभाषा :: पृष्ठ-503
113-वृहदारण्यकोपनिषद्:: 4:4:2
114-योगसूत्रभाष्य :: 3:15
115-पातञ्जलयोगसूत्र :: 2:12
116-योगसूत्रभाष्य :: 2:12
117-वैशेषिकसूत्र :: 10:1,6:7
118-प्रशस्तपादभाष्य :: पृष्ठ:647
119-वृहदारण्यकोपनिषद् :: पृष्ठ-44-2:3
120-भक्तिरसायन :: 1:6-7
121-सिद्धमुक्तावली :: पृष्ठ-251
122-भावपरिभाषा :: पृष्ठ 481
123-मितभाषा :: पृष्ठ-29-33
124-श्लोकवार्तिक :: 4:112

125-श्लोकवार्तिक :: 4:112
126-सिद्धान्तबिन्दु :: पृष्ठ-11-23
127-श्लोकवार्तिक :: 4:26,28
128-वैशेषिकसूत्र :: 9:2:13
129-न्यायबिन्दु :: पृष्ठ-20
130-न्यायबिन्दु :: पृष्ठ-20
131-मुण्डकोपनिषद् :: 3:1:1
132-पञ्चदशी :: 8:25,8:55
133-पञ्चदशी :: 8:43
134-वेदान्तसूक्तमञ्जरी :: 1:91:92
135-वेदान्तसूक्तमञ्जरी :: 1:96
136-वैशेषिकसूत्र टीका :: 8:1:6
137-न्यायकन्दली :: पृष्ठ-42-44
138-सिद्धान्तमुक्तावली :: पृष्ठ-261-71
139-मानमेयोदय पृष्ठ-132
140-मानमेयोदय पृष्ठ-132-33
141-तत्वसंग्रह :: 1648,1650,1657
142-तत्वसंग्रह :: 709,710,714,715,
143-तत्वसंग्रह :: 709,710,714,715
144-तत्वसंग्रह :: 2:7 कृष्णमाचार्य
145-न्यायमञ्जरी पृष्ठ-90
146-न्यायमञ्जरी पृष्ठ-1
147-वाक्यपदीयब्रह्मकाण्ड-118पृष्ठ-92
148-न्यायमञ्जरी पृष्ठ-90(335-36)
149-श्लोकवार्तिक :: 4:32
150-भामतीटीका :: 1:1:1
151-यतीन्द्रमतदीपिका :: पृष्ठ-8(आनन्दाश्रम)
152-तत्ववृत्ति :: 1:13
153-तत्ववार्तिक :: 1:12
154-योगसूत्रभाष्य :: 1:7
155-सांख्यसूत्रभाष्य :: 1:91
156-वेदान्तपरिभाषा :: पृष्ठ-22-23
157-न्यायसूत्रभाष्य :: 2:1:30
158-न्यायसूत्र :: 2:1:37

159-न्यायसूत्रभाष्य :: 2:1:37
160-न्यायसूत्रभाष्य :: 2:1:38
161-सिद्धान्तमुक्तावली पृष्ठ-284-86
162-तत्वार्थवृत्तौ :: 1:13
163-वेदान्तपरिभाषा :: पृष्ठ-78-81
164-न्यायविन्दुटीका :: पृष्ठ-30
165-न्यायविन्दुटीका :: पृष्ठ-30
166-न्यायविन्दुटीका :: पृष्ठ-30-31
167-सर्वदारसंग्रह (बौद्धग्रंथ)
168-तत्वसंग्रह :: 1488,1515,1521
169-वैशेषिकसूत्र :: 9:2:3
170-न्यायकन्दली पृष्ठ-512,515,
171-न्यायसूत्रभाष्य :: 2:1:50
172-न्यायसूत्रभाष्य :: 2:1:52
173-न्यायमञ्जरी-पृष्ठ :: 64:65
174-पाणिनिमहाभाष्य :: 1:1:1
175-योगसूत्रभाष्य :: 3:17
176-योगसूत्रभाष्य :: 3:17
177-परमलघुमञ्जूषा :: पृष्ठ-25-27
178-स्फोटसिद्धि:पृष्ठ-27-28
179-न्यायमञ्जरी-पृष्ठ-110-11
180-प्रश्नोपनिषद् :: 4:1
181-प्रश्नोपनिषद् :: 4:2
182-कैवल्योपनिषद् :: 1:12
183-माण्डूक्योपनिषद् :: 1:3
184-माण्डूक्योपनिषद् :: 1:3
185-सांख्यसूत्र :: 1::148
186-सांख्यसूत्र :: 1::148
187-माण्डूक्योपनिषद् :: 1:4
188-माण्डूक्योपनिषद् :: 1:4
189-वृहदारण्यकोपनिषद् :: 2:1:18
190-वृहदारण्यकोपनिषद् :: 2:1:18
191- वृहदारण्यकोपनिषद् :: 4:3:10
192- वृहदारण्यकोपनिषद् :: 4:3:20

193-कैवल्योपनिषद् :: 1:13
194-कणादरहस्यपृष्ठ-120
195-चरकसंहिता :: 5:5:40-41
196-न्यायसूत्र :: 4:2:29-31
197-तर्कभाषा :: पृष्ठ-190
198-भोजवृत्ति :: 1:11
199-यतीन्द्रमतदीपिका-पृष्ठ-12
200-ब्रह्मसूत्रमध्वभाष्य : 3:2:3
201-न्यायमञ्जरीपृष्ठ-165